अथ कुरुहरत्नावलि

Title:- कुरुहरत्नावलि

Author:- रामचन्द्रतसल

Date:- सं. 1747

Subject:- ?

पत्रे:- 68

॥ श्रीगणपतये नमः ॥ ॥ नमस्कृत्य रमानाथं मठविठ्ठलसूनुना ॥ कृत्य
रत्नावली रम्या तन्यते विदुषां मुदे ॥ १ ॥ तत्र चैत्रशुक्लप्रतिपदि वत्सरा
रंभः । विधिस्तत्र प्रतिपदौदयिकी ग्राह्या ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्र
थमेहनि ॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥ इति ब्रह्मपुराणात् ॥
दिनद्वये तद्व्याप्तौ तदस्पर्शे वा पूर्वैव ॥ वत्सरादौ वसंतादौ बलिराज्ये तथै
व च ॥ पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥ इति ॥ वृद्धवसिष्ठोक्तेः ॥ अ
स्य मलमासत्वे तत्रैव संवत्सरारंभः ॥ तस्याः एव संवत्सराद्यतिथित्वात्
॥ अत्रेदं तैलाभ्यंगो नित्यः ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ तैलाभ्यं
गमकुर्वाणो नरकं प्रतिपद्यते इति ॥ वृद्धवसिष्ठोक्तेः ॥ अत्रैव नववर्षारंभः ।
मलमासपाते तु उत्कर्षः ॥ अत्र प्रपादानमुक्तं ॥ भविष्यपुराणे ॥ अतीतां

१

तेपाल्गुणे मासि प्राप्ते चैत्रे महोत्सवे॥ पुण्येऽह्नि विप्रकथिते प्रपादानं समा
रभेत॥ तत्र मंत्रः॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता॥ अस्याः
प्रदानात्पितरस्तृप्यंतु हि पितामहाः इति॥ तत्रैव॥ अविचार्य ततो देयं
जलं मासचतुष्टयमिति॥ तथा॥ प्रपादातुमशक्तेन विशेषाद्धर्मलिप्सु
ना॥ प्रत्यहं धर्म्मघटको वस्त्रसंवेष्टिताननः॥ ब्राह्मणस्य गृहे देयः शी
तामलजलः शुचिः॥ तत्र मंत्रः॥ एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्म
कः॥ अस्य प्रदानात्सकला मम संतु मनोरथाः॥ अनेन विधिना यस्तु ध
र्मकुंभं प्रयच्छति॥ प्रपादानफलं सोपि प्राप्नोतीह न संशयः॥ इति॥ चै
त्रे शुक्लतृतीयायामीश्वरयुतां गौरीं संपूज्यांदोलयेत्॥ तथा च देवी
पुराणे॥ तृतीयायां यजेद्देवीं शंकरेण समन्वितां॥ कुंकुमागरुकर्पूरम

णि वस्त्रसुगंधकैः॥ स्रग्गंधधूपदीपैश्च दमनेन विशेषतः॥ अब्दं दोलयेत्त
तो वत्सरं शिवो मा तुष्टये सदा॥ रात्रौ जागरणं कार्यं प्रातर्दद्याच्च दक्षिणां
हेमवस्त्रान्नपानादि ततो बूला निसृजेत्तथेति॥ मार्त्तिस्वरूपमुक्तं देवीपु
राणे॥ सौवर्णं तु सदा कार्यं राजतं शंकरस्तथा॥ चतुर्भुजस्तु देवेशो
द्विभुजा तु उमा भवेदिति॥ इयं तु हस्तमात्रापि परा ग्राह्या॥ इयं च मन्वा
दिः॥ शुक्लपक्षगतत्वोक्तेस्तु पूर्वविद्धा व्यापिनी ग्राह्या॥ हेमाद्रिस्तु॥
पूर्वाह्णे तु सदा ग्राह्या शुक्ला मन्वयुगादयः॥ दैवे कर्मणि पित्र्ये च पक्षे
मे चैवापराह्णिके॥ इति गालववचनात्॥ पौर्वाह्णिकी ग्राह्येत्याह॥
अत्र श्राद्धमुक्तं॥ मात्स्ये॥ कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति॥ अधिकमासेपीदं के

२

तीर्थं ॥ मन्वादिके तैर्थिकं च कुर्यान्मासद्वयेपि च ॥ इति स्मृतिचन्द्रिका
त्के: ॥ अत्र पिंडदानं नास्ति ॥ तथा कालादर्शे ॥ विषुवायन संक्रांति मन्वा
दिषु युगादिषु ॥ विहाय पिंडनिर्वापं सर्वश्राद्धं समाचरेदिति ॥ एतदुक
रणे न्यायस्थिते मुक्तो मन्त्रविधाने ॥ सेमवः प्रतिमंत्रश्चरात वारं जलेन पद
॥ मन्वादयोन्यूनाः कुर्वते नैव वायदीति ॥ एवं षण्णवति ॥ श्राद्धान्यपि
नित्यानि ॥ एतेषां मध्ये संग्रहः ॥ अमा १२ मनुः १४ युग ४ संक्रांतिः १२
धृतिः १२ पात १२ महालयाः १५ अन्वष्टक्यं च पूर्वेद्युः षण्णवत्याष्ट
कास्तथेति ॥ १५ चैत्रशुक्लतृतीयामत्स्यजयंती चैत्रशुक्लपंचमी
त्यन्ये ॥ आषाढशुक्लैकादशीत्यपरे ॥ इयं च मध्याह्नव्यापिनी ग्रा
ह्या ॥ इयं च तदुपासकानां नित्या ॥ अन्येषां काम्या ॥ चैत्रशुक्लपं

चमीकल्पादि॥ अत्र स्नानादि महाफलं॥ अस्यामेव पूजा॥ हेमाद्रौ
विष्णुधर्मोत्तरे॥ चैत्रशुक्लस्य पंचम्यां पूजयित्वा तु पार्थ श्रियं॥ सकृ
देवाप्नुयादेतत्फलं संवत्सरोद्भवमिति॥ चैत्रशुक्लाष्टम्यां भवान्याउ
त्पत्तिः॥ तत्र भवानीयात्रोक्ता॥ काशीखंडे॥ भवानीयस्तु पश्येत्तु शुक्ला
ष्टम्यां मधौ नरः॥ न जातु शोकं लभते सदानंदमयो भवेदिति॥ अत्रैव
अशोककलिकाप्राशनमुक्तं लैंगे॥ अशोककलिकाश्चाष्टौ ये पिबंति पुन
र्वसौ॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः॥ पुनर्वसुयोगो नावश्य
कः॥ किंतु प्राशस्त्यातिशयार्थः॥ तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रि
तं॥ तस्मात्तिथिं प्रशंसंति न नक्षत्रं तिथिं विनेति॥ ज्योतिःशास्त्रे॥ प्रा
शनमंत्रस्तु॥ त्वमशोक हराभीष्ट मधुमाससिताष्टमी॥ प्रातस्तुवि

धिनाम्नात्वा वाजपेयफलंलभेदिति। चैत्रशुक्लेनवमी रामनवमी॥ सा
चमध्याह्नयोगिनी ग्राह्या॥ अगस्तिसंहितायां। चैत्रशुक्लेतुनवमीपुन
र्वसुयुतादपि॥ सैवमध्याह्नयोगेनमहापुण्यतमा भवेति। दिनद्वये
तादृशी चेत्पुनर्वसुयुता ग्राह्या॥ तादृश्यपि दिनद्वये चेत्तदा परा ग्राह्या
॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः॥ इति अगस्तिसंहितावं
चनात्॥ इयं चेतदुपासकानां नित्या॥ काम्या तु सर्वेषां त्रवतीत्यन्यत्र
विस्तरः॥ अत्र मध्याह्ने पूजा रात्रौ जागरणं परेद्युः॥ प्रातः पायसहोम
ब्राह्मणभोजनपारणादि चेति दिनद्वयात्मकं व्रतं कर्तव्यं॥ इयं मल
मासे न कार्या॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइति वचना
त्॥ संकल्पमंत्रः॥ उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव॥ तेन प्रीतो भ

वंत्वं नो: संसारान्नाहि मां हरेति ॥ अर्घ्यमंत्रस्तु ॥ दशाननवधार्थाय धर्मसंरक्षणाय च ॥ राक्षसानां विनाशाय दैत्यानां निधनाय च ॥ परित्राणाय साधूनां जातो रामस्वयं हरिः ॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितो नघेति ॥ प्रतिमादानमंत्रस्तु ॥ इमां स्वर्णमयीं रामप्रतिमां समलंकृतां ॥ चित्रवस्त्रयुगच्छन्नां रामोहं राघवाय ते ॥ श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥ इति दत्वा विधानेन दद्याद्वेदविदे शुभं ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति ॥ चैत्र शुक्लैकादश्यां दोलोत्सवः कृतो ब्राह्मे ॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ॥ आंदोलनीयो देवेशः सलक्ष्मीको महोत्सवैरिति ॥ चैत्रशुक्लद्वादश्यां दमनोत्सवः ॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ॥ बौधायनादिभिः प्रोक्तो कर्तव्यः

राम

१४

प्रतिवत्सरमिति॥ रामार्चनचंद्रिकोक्तेः॥ अत्र पारणाहर्विवर्ज्जितं॥ पा
रणाहे नलभ्येत द्वादशी कलयापि चेत्॥ नंदा त्रयोदशी यात्यापवि
त्रदमनार्पणं इति तत्रैवोक्तेः॥ नित्यं चैवं॥ उज्जेध्रितं मधोर्दोलां श्रावणे
तेतु प्रेंखने॥ चैत्रे चैव दमनारोपमकुर्वाणो व्रजत्यधः इति पद्मपुराण
ले॥ इदं शुक्लाष्टम्यादावपि कार्यं॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्प
णं॥ ईशानस्य बलिर्विष्णोः शयनं परिवर्तनं॥ कुर्यान्नु क्रस्य चेद्गुरोर्मो
ढ्येऽपीति विनिश्चय इति॥ वृद्धगार्ग्यवचनात्॥ चैत्रशुक्लत्रयोदश्यां
मासमंगवृतं॥ तत्र प्रवर्त्तयात्वा॥ अस्यामेव मदनपूजोक्ता॥ कूर्मपुराणे॥
चैत्रशुक्लत्रयोदश्यां मदनं चंदनात्मकं॥ कृत्वा मं पूज्य यत्नेन वीजयु
त्यल्लनेनच॥ ततः संधुः स्थितः कामः पुत्रपौत्रसमृद्धिद इति॥ चैत्रशुक्ले

चतुर्दशी रात्रियोगिनी पूर्वा ग्राह्या ॥ माधवः श्रावणमासस्य शुक्लायां तु
चतुर्दशी ॥ सा रात्रिव्यापिनी ग्राह्या इति ॥ बौधायनवचनात् ॥ चैत्री पौ
र्णमासी सामान्यनिर्णयात् पूर्वैव ॥ अत्र विशेषो विस्मृत्युक्तौ ॥ चैत्री चि
त्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति ॥ तथा ब्रा
ह्मे ॥ मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रकी ॥ तत्राश्वमेधजं पुण्यं स्नाने
श्राद्धादिके ऽवेत ॥ पापवीये ॥ संवत्सरकृतार्चायाः साफल्यं प्राप्याखिला
न्सुरान् ॥ दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवं ॥ इयं मन्वादिः ॥ चैत्र
शुक्ले कृष्ण चतुर्दश्यां विशेषत इति ॥ अत्र पूर्वा ग्राह्या ॥ कृष्णपक्षे
गतत्वात् ॥ ॥ इति श्रीतत्सदुपनामकरामचंद्रविरचितायां कृत्यर
त्नावल्यां चैत्रकृत्यानि ॥ अथ वैशाखकृत्यं ॥ पाद्मे ॥ तीर्थे चान्तुदि

न स्नानं तिलैश्चापि न तत्तर्पणं ॥ दानं धर्मघटादीनां मधुसूदनपूजनं ॥ माध
वे मासि कुर्वीत मधुसूदनतुष्टिदं ॥ अथ वैशाखस्नानं ॥ वैष्णुस्मृतिपा
द्मयोः ॥ तुलामकरमेषेषु प्रातःस्नानं विधीयते ॥ हविष्यं ब्रह्मचर्यं च महा
पातकनाशनमिति ॥ अत्र सौरमास उक्तः ॥ अन्यदपि पद्मे द्वयमुक्तं पा
द्मे ॥ मधुमासस्य शुक्लायामेकादश्यामुपोषितः ॥ पंचदश्यां चैत्रे वीर
मेषसंक्रमणेऽपि वा ॥ वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ॥ मधुसू
दनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं ॥ अत्र मंत्रः ॥ वैशाखं सकलं मासं मेषसं
क्रमणे रवेः ॥ प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहंतुः प्र
सादेन ब्राह्मणानामनुग्रहात ॥ निर्विघ्नमस्तु मे पुण्यं वैशाखस्नान
मन्वहं ॥ माधवे मेषगे भानौ मुरारे मधुसूदन ॥ प्रातःस्नानेन मे नाथ
फलदो भव पापहन्निति ॥ तीर्थनामापरिज्ञाने तत्रैव ॥ यज्ञानज्ञा

यतेनाम तस्य तीर्थस्य गोद्विजाः॥ तत्रैतदुच्चारणं कार्यं विष्णुतीर्थमिदं
त्विति॥ अत्र त्रिकाले विष्णुपूजा कार्या॥ अश्वत्थमूले जलदानं चेत्या
दि तत्रैवोक्तं॥ अशक्तस्य त्र्यहं स्नानमुक्तं पाद्मे॥ त्रयोदश्यां चतुर्दश्यां
वैशाख्यां च दिनत्रयं॥ अपि सम्यग्विधानेन नारी वा पुरुषोपि वा॥ प्रातः
स्नातस्तु नियतः सर्वपापैः प्रमुच्यते॥ यदा वैशाखो मलमासस्तदा स
मासिशुद्धमासे पूर्णिमायां कर्तव्या॥ तथा॥ वैशाख्यां विधिवत्स्नात्वा
भोजये ब्राह्मणान्दश॥ कृशरं सर्वपापेभ्यो मुच्यते नात्र संशय इति
॥ वैशाखशुक्लतृतीयाक्षय्यतृतीया॥ इयं गौरीव्रते उत्तरा कार्या॥ आ
हे कुतुपपूर्वाह्णव्यापिनी॥ उदकुंभदाने स्नानादौ तु तरा॥ इयं च त्रेता
युगादिः॥ भारते॥ या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवैः॥
स्नात्वा हुत्वा च दत्त्वा च जप्त्वानंतफलं लभेदिति॥ केचित्तु॥ वैशा

रवस्य तृतीयायां यः पूर्वविद्धां करोति वै ॥ हव्यं देवा न गृह्णंति कव्यं च पितर

स्तथेति ॥ गोभिलवचनात् ॥ पूर्वाह्निकतुसदा कार्याः शुक्लामनुयुगादय इ

ति ॥ नारदवचनाच्च ॥ श्राद्धेपि पूर्वाह्णव्यापिनी उत्तरा कार्येत्युदंति ॥ तत्को

कात्दर्शादिविरुद्धं ॥ अयुक्तं च ॥ अपराह्णः पितृणां अपराह्णे पितृक्रिये

त्यादिवचनैरपराह्णकालत्वाभिधानात् कर्मणोयस्येति वाक्यादपराह्ण

व्यापिन्या एव श्राद्धेयोग्यत्वात् ॥ दैवशुक्लेइत्यादिवाक्यगतः पूर्वाह्णशब्द

स्तु तु पूर्वाह्णेपरः ॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षण इत्येते

वाक्यगत पूर्वाह्णशब्दवत् ॥ पूर्वलिखितं गोभिलवचनं त्वेनाकरं ॥ साक

रत्वेपि पित्रुद्देशेन क्रियमाण तर्पणादिविषयं व्याख्येयमित्यन्यत्र विस्त

रः ॥ अन्नविषय ॥ वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ॥ गंगातोयेनरः

स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ॥
यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति ॥ अत्र दाने विशेषो ऽनुवि
ष्णुधर्मे ॥ प्रक्रम्य ॥ उदकुंभान्सकनकान्सान्नान्सर्वरसैः सह ॥ यवगोधूमच
णकान्सक्तून्दध्योदनं तथा ॥ ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते इति
॥ देवीपुराणे ॥ तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रयुज्य च ॥ उदकुंभप्रदा
नेन शिवलोके महीयते ॥ मंत्रस्तु ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवा
त्मकः ॥ अस्य प्रदानात्तृप्यंतु पितरोऽपि पितामहाः ॥ गंधोदकतिलैर्मिश्रं
सान्नं कुंभं फलान्वितं ॥ पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु ॥ इति ॥
युगादिषु रात्रिभोजने प्रायश्चित्तमुक्तं मदनविधाने ॥ रात्रौ तु भुंक्ते वत्सरे तु मन्वा
दिषु युगादिषु ॥ अजिह्मं वृष्टिमंत्रं च जपेद्दशानपातकमिति ॥ दशवारमि
त्यर्थः ॥ यमः ॥ कृतोपवासाः सलिले ये युगादिदिनेषु तु ॥ दास्यंत्यन्नानि

१५।

सहितं तेषां लोकामहोदयाइति॥ उपवासे पूर्वा॥ सवैधृतिव्यतीपातोयु
गमन्वादयस्तथा॥ संमुखोउपवासेस्पृष्टोनादावेतिमाःस्मृता॥ इत्युक्तं
तमहोदोहृतेवचनात्॥ मार्त्तण्डमासपातेतत्रापियुगादिनिमित्तंश्राद्धंका
र्यं॥ मन्वादौचयुगादौचैतन्मासोरुमध्येपरपीति॥ मरीचिवचनात्॥ अत्रैस
मुद्रस्नानंमहाफलमुक्तं॥ सौरपुराणे॥ युगादौतुनरःस्नात्वाविधिवल्ल
वणोदधौ॥ गोसहस्रप्रदानस्यकुरुक्षेत्रेफलंचयत्॥ तत्फलंलभतेमर्त्यो
ऽपिदानस्यचक्षयमिति॥ इयमेवतृतीयापरशुरामजयंती॥ साचप्रदो
षव्यापिनीग्राह्या॥ तथाचमार्गवार्चनदीपिकायांस्कांदे॥ वैशाखस्य
सितेपक्षेतृतीयायांपुनर्वसौ॥ निशायाःप्रथमेयामेरामाख्यःसमयेहरिः
॥ रेणुकायास्तुयोगर्भादवतीर्णोविभुःस्वयमिति॥ दिनद्वयेतद्व्याप्तौ
अंशतःसमव्याप्तौपराचैव॥ अन्यथापूर्वैव॥ तदुक्तंतत्रैवजन्मविषये॥ शुक्ला

(४)

तृतीया वैशाखे शुद्धो पोष्यादिनद्वये ॥ निशायां प्रवेयामेव दुत्तरान्यत्र प
र्विकैति ॥ वैशाखशुक्ले सप्तम्यां गंगोत्पत्तिः ॥ तेदु कैपृथ्वीचं द्वीपे बोहने ॥
वैशाखशुक्लेसप्तम्यां जह्नुनाजाह्नवी पुरा ॥ क्रोधात्पीता पुनस्त्यक्ता कर्ण
रंध्रात्तु दक्षिणात् ॥ तां तत्रैव प्रजयेद्देवीं गंगां गगनमेखलां ॥ इति ॥ इयं चाशि
ष्टाचारान्मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वा ष
ण्मुन्योरिति युग्मवाक्यात् ॥ वैशाखशुक्ले द्वादश्यां योगविशेषो ॥ हेमाद्रौ ॥ पं
चाननस्थो गुरुरस्तमि पुत्रो मेषे रविः स्याद्यदि शुक्लपक्षे ॥ पाशाभिधाना करे
रणोमैत्यक्ता तिथिर्व्यतीपात इतीहयोगः ॥ अस्मिंस्तु गांगे मिहिर एव वद्रुदा
नेन सर्वं परिहाय पापं ॥ सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनु
नुष्य इति ॥ पंचाननः सिंह ॥ पाशाभिधा तिथि द्वादशी ॥ करजो हस्तः ॥ वै
शाखशुद्ध १४ चतुर्दशी नृसिंहजयंती ॥ सा च प्रदोषव्यापिनी ग्राह्या ॥ प्र

दोषस्य कर्मकालत्वात् ॥ तदुक्तं हेमाद्रौ नारसिंहपुराणे ॥ वैशाखे शुक्लपक्षे तु
चतुर्दश्यां निशामुखे ॥ मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं ॥ वर्षे वर्षे तु क
र्तव्यं मम संतुष्टिकारणमिति ॥ दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा ॥
विषमव्याप्तौ त्वधिकव्याप्तिमती ॥ दिनद्वयेप्यव्याप्तौ गौणकालव्याप्तिवा
त्पूर्वेति केचित् ॥ तन्न मन्त्वेवं प्रतिभाति ॥ यत्रैककर्मकालो दोषस्तत्र गौणकालविधा
नमस्ति ॥ तत्र मुख्यकालव्याप्त्यभावे गौणकालव्याप्त्या निर्णयो न तु सर्वत्र।
युग्मादिवाक्यानामानर्थक्यप्रसंगात् ॥ न च दिनद्वये कर्मकालव्याप्तिप
र्दौ तस्य निर्णयकत्वाज्ञानर्थक्यमिति वाच्यं ॥ तत्रापि गौणकालव्याप्त्याधि
क्येन निर्णयात् ॥ तस्माद्दिनद्वयेपि प्रदोषव्याप्त्यभावे [illegible]शुक्लपक्षेगत्वात्परे
वेति ॥ अस्यां च संकल्पः सुप्रोक्तो पञ्चमो माध्याह्ने एवं कर्तव्यः ॥ ततो मध्या
ह्ने वेळायां नद्यादौ विमलेजले इत्युपक्रम्य परिधाय ततोपवासो व्रतकर्म

(७)

समारभेदिति तत्रैवोक्तेः॥ तत्र मंत्रः॥ श्रीनृसिंह महौषध त्वं दयां कृत्वा मम
मोपरि॥ अर्घ्यो हं चैव विधास्यामि त्वत्ते निर्विघ्नतां नयेति॥ ततो मध्याह्ने न
द्यादौ मृद्गोमयतिलामलकैः स्नात्वा गृहमागत्य गोमयोपलिप्ते शुद्ध
ले कृत्वा तत्र कलशं संस्थाप्य हैमीं पलं तदर्धं तदर्धार्धं मितां शक्तिमां सिं
हवाप्य प्राणप्रतिष्ठां कृत्वा आवाहनाद्युपचारैः कृत्वा स्तमय समये पं
चामृतेन स्नापयित्वा गंधाक्षतैः पूजयेत्॥ तत्र मंत्रः॥ चंदनं शीतलं दिव्यं
चंद्रकुंकुममिश्रितं॥ ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर॥ इति चंदनमं
त्रः॥ कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो॥ पूजयित्वा नृसिंह त्वां
ल दमासुहन नमोस्तु ते॥ इति पुष्पमंत्रः॥ कालागरुसमं धूपं सर्वदेवसुव
ल्लभं॥ करोमि ते महाविष्णो सर्वकामसमृद्धये॥ इति धूपः॥ दीपन्याय ग्रह
रेः श्रीकान्त मोरारि विनाशनः॥ दीपेनाभ्यंतते तेजस्तस्माद्दीपं ददामि ते॥ ॥ १९ ॥

दीपः॥ नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितं॥ ददामि ते रमाकांत सर्वपा-
पक्षयं कुरु॥ इति नैवेद्यं॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते॥ अने-
नार्घप्रदानेन सफलाः स्युर्मनोरथाः॥ इत्यर्घमंत्रः॥ एवं पूजयित्वा जागर-
णादि कुर्यादिति॥ अस्या एव योगविशेषेण प्राशस्त्यं तत्रैवोक्तं॥ स्वाती-
नक्षत्रयोगे च शनिवारे तु मद्व्रतं॥ सिद्धियोगस्य संयोगे वणिजे करणे
तथा॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः॥ तथा एतैर्योगैर्विना-
पि स्यान्मद्दिनं पापनाशनं॥ तथा॥ सर्वेषामेव वर्णानामधिकारोस्ति मद्व्र-
ते॥ तथा॥ विज्ञाय मद्दिनं यस्तु लंघयेत्स पापकृन्नरः॥ स याति नरकं घोरं या-
वच्चंद्रदिवाकरौ॥ अत एवेदं नित्यकाम्यत्वादुक्तं॥ वस्तुतस्तु॥ श्रीनृसिं-
होपासकानामेव नित्यं॥ अन्येषां तु काम्यमेव॥ वैशाखशुक्लपौर्णमा-

स्यां विशेषोत्र विष्णे॥ वैशाखी कार्त्तिकी माघी तिथयोतीव पूजिताः॥ स्नानदा
नविहीनास्ता नेनेयाः पांडुनंदनेति॥ ॥ इति वैशाख्य कृत्यानि॥ ॥ ज्येष्ठशुक्ल
तृतीयायां रंभाव्रतं॥ तथोक्तं चेत्तद्विष्णो॥ ज्येष्ठे कुलं व यत्नेन रंभाख्यं व्रतमुत्तमं
॥ ज्येष्ठशुक्लतृतीयायां स्नातानियमतत्परेति॥ इयं पूर्वविद्धा ग्राह्या॥ बृह
त्तपा तथा रंभा सावित्री वटपैतृकी। कृष्णाष्टमी च भूता च कर्तव्या संमुखी ति
थिरिति॥ स्कांदे॥ ज्येष्ठशुक्ले चतुर्थ्यां गौरीव्रतं॥ ब्रह्मपुराणे॥ ज्येष्ठशुक्ले
चतुर्थ्यां गौरी संभूता पुरा॥ तस्मात्सा तत्र संपूज्या स्त्रीभिः सौभा
ग्यवृद्धये॥ उपहारैश्च विविधैः॥ तां नृत्यगीतवादित्रैः॥ होमैः पयोभिर्यैस्त्रै
श्चपत्रपुष्पैः सुगंधिभिरिति॥ ज्येष्ठशुक्लदशमी दशहरा॥ तदुक्तं हेमाद्रौ ब्र
विष्ये॥ ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता॥ हरते दशपापानि तस्मा
द्दशहरा स्मृतेति॥ वाराहे तु गंगापादशहरात्वमुक्तं॥ दशम्यां शुक्लप

१०

दोतु ज्येष्ठे मासि कुजे हनि॥ अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा॥ हरते
दश पापानि तस्माद्दशहरा स्मृता॥ तस्माद्व्रते प्रकुर्वीत दानं चैव विशेषत
इति॥ स्कांदे तु दशयोगा उक्ताः॥ यथा॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुध
हस्तयोः॥ गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ॥ दशयोगे नरः स्नात्वा स
र्वपापैः प्रमुच्यते [illegible]ति॥ इह बुधभौमयोर्विकल्पः॥ इयं चरखंडत्वे यत्रैव बा
हुल्यं सा ग्राह्या॥ योगाधिक्ये फलाधिक्यं॥ गंगायां अभावे अन्यस्यां स
रिति कार्यं॥ तथा च स्कांदे॥ यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं॥
मुच्यते दशभिः पापैः समहापातकैरिति॥ दशपापान्युक्तानि स्कांदे॥ अ
दत्तानामुपादानं हिंसा चैवाविधानतः॥ परदारोपसेवा च कायिकं त्रिवि
धं स्मृतं॥ पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः॥ असंबद्धप्रलापश्च वा
ङ्मयं स्याच्चतुर्विधं॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं॥ वितथाभि

11

निवेशश्च मानसं त्रिविधं स्मृतमिति ॥ अत्र विशेषः काशीखंडे ॥ ज्येष्ठे मासि
सिते पक्षे प्राप्य प्रतिपदं तिथिं ॥ दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ॥ आशुक्लपक्षे दशमीं प्रतिजन्मा
घैर्मुक्तजेदिति ॥ तथा ॥ लिंगे दशाश्वमेधे दृष्ट्वा दशहरातिथौ ॥ दशज
न्मार्जितैः पापैः त्यज्यते नात्र संशय इति ॥ मलमासपाते तु तत्रापि दशह
राकृतं कार्यं ॥ पुनः शुद्धे तु भवत्येवेति ॥ अन्यत्र मत्स्ये तोद्धृतं ॥ जेष्ठशुक्ले
कादश्यां निर्जलैकादशीव्रतं ॥ मदनरत्ने स्कांदे ॥ जेष्ठे मासि नृपश्रेष्ठ्या
शुक्लैकादशी शुभा ॥ निर्जलं समुपोष्यात्र जले कुंभान् सशर्करान् ॥ प्रदा
य विप्रमुख्येभ्यः स्नापत्रय विवर्जितः ॥ विष्णुलोकमवाप्नोति मोदते विष्णु
सन्निधाविति ॥ अत्र पौर्णमास्यां सावित्रीव्रतं ॥ स्कांदे भविष्ये ॥ ज्ये
ष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे इत्युपक्रम्य व्रतं सावित्रीमुद्दिश्य

दिवारात्रं स्थिरा भवदित्युक्तं ते उपसंहृतं ॥ ज्येष्ठमासि सिते पक्षे पूर्णिमायां
व्रतं शुभं ॥ चीर्णं पुरा महाराज्ञ्या कथितं ते मयानघेति ॥ दाक्षिणात्यास्त्वेतदेम
वकुर्वंति ॥ पाश्चात्यादयस्त्वमायायामाचरंति ॥ उक्तं च निर्णयामृते रु विष्णौ ॥
अमायां च तथा ज्येष्ठे वटमूले महासती ॥ त्रिरात्रोपोषिता नारी विधिनानेन
पूजयेत ॥ अशक्तौ तु त्रयोदश्यां नक्तं कुर्यात्ततो द्वया ॥ अयाचितं चतुर्द
श्यां अमायां समुपोषणमिति ॥ हेमाद्र्यादिलिखितं ॥ भाद्रपूर्णिमायामिद
मुक्तं ॥ अत्र पूर्णिमाऽमावास्ये पूर्वविद्धे ग्राह्ये ॥ भूतविद्धा न कर्तव्या अमा
वास्या च पूर्णिमा ॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ॥ ब्रह्मवै
वर्तात् ॥ अत्र पूर्णिमानुरोधेन यथा त्रिरात्रिसंपत्तिर्भवति तथा त्रयोदश्या
दिग्राह्यं ॥ तस्याः प्राधान्यात् ॥ एवममायामपि ॥ अस्यामेव पौर्णमास्यां
विशेषः ॥ आदित्यपुराणे ॥ ज्येष्ठमासि तिलान्दद्यात्पौर्णमास्यां विशे
षतः ॥ अश्वमेधस्य यत्पुण्यं तत्पुण्यं प्राप्नोति न संशय इति ॥ ॥ इति ज्येष्ठकृत्या

नि॥ ॥आषाढस्य दशमी पौर्णमासी च मन्वादिः॥ निर्णयस्तु पूर्वमुक्तः॥ आ
षाढभाद्रपदकार्त्तिकशुक्लद्वादशीषु अनुराधाश्रवणरेवतीयुक्तासु पारणं
न कार्यमिति। उक्तं भविष्ये॥ आभाकासितपक्षेषु मैत्रश्रवणरेवतीः॥ संगमे
न हि भुंजीत द्वादशीद्वादशीर्हरेदिति॥ भविष्ये॥ द्वादश्यां तु शुक्लपक्षे च प्रस्वा
पावर्त्तनोत्सवे तिथौ॥ वाराहपुराणे॥ द्वादश्यां संधिसमये नक्षत्राणामसंभ
वे॥ आभाकासितपक्षेषु शयनावर्त्तनादिकमिति॥ अत्र द्वादश्यामिति
पारणाहर्विवक्षितं॥ पारणाहे पूर्वरात्रे घंटादीन्वादयन्मुहुरिति॥ रामा
र्चनचंद्रिकायां इदं च मत्स्यमांसेन कार्यं॥ स्नानस्य बलिविष्णोः शयने प
रिवर्तने इति॥ कालादर्शे निषेधात्॥ अत्रैव चातुर्मास्यारंभो भारते उक्तः॥ आ
षाढे तु सिते पक्षे एकादश्यामुपोषितः॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नि
यतो नरः इति॥ अस्य नित्यत्वं तत्रैवोक्तं॥ वार्षिकांश्चतुरो मासान्वाहयेत्के
नचिन्नरः॥ व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवं॥ असंभवे तुलाके तु क

तैर्व्यं तत्प्रयत्नेतेति॥ अस्यारंभः शुक्लाषाढादावपि कार्यं॥ नैःशेशावं नमोदं च शु
क्लेगुर्वोर्नवातिथेः॥ खंडत्वेपि तयेदादौ चातुर्मास्यविधौ नरः इति॥ वचनात्
॥ इदं च द्वितीयाद्यारंभ विशेषं॥ एवमाशौचादौ द्वितीयारंभोमेवत्येवा॥ अ
शुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्॥ व्रतमेतन्नरः कृत्वा मुच्यते सर्व
पातकैरिति॥ स्कांदे लोकेः॥ नारब्धे सूतकं नस्यात् दनारब्धे तु सूतकमिति विष्णु
वचनाच्च॥ पृतुः अस्तं क्रांते तथा मासं देवे पित्र्ये च कर्मति॥ मलमास मरीच
चे वर्जयेन्मतिमान्नर इति॥ भविष्यपुराणे च नेतत्प्रथमारं अविषयं॥ व्रत
ग्रहणप्रकारस्तु॥ हेमाद्रौ भविष्ये॥ एवं तां व्रतिमां विष्णोः पूजयित्वा स्वयं न
रः॥ भावेनायतो विष्णोः कृतांजलिपुटस्तथा॥ चतुरो वार्षिकान्मासान्देव
स्योत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युतेति॥ भविष्ये॥
श्रावणे वर्जये छाकं दधि भाद्रपदे तथा॥ दुग्धमाश्वयुजे मासि कार्त्तिके द्वि

दलं त्यजेत् ॥ स्कांदे ॥ चत्वार्येतानि नित्यानि चतुरा श्रमवर्तिनां ॥ प्रथमे मासि
कर्तव्यं नित्यं शाकाव्रतं नरैः ॥ द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं ॥ पयोव्र
तं तृतीये तु चतुर्थे पि निशामयः ॥ द्विदलं बहुबीजं च वृंताकं चैव वर्जयेत् ॥ नि
त्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः ॥ तथा ॥ जंबीरं राजमाषांश्च मूलकं कर्क
टकं ॥ कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेत् बुधः ॥ स्कांदे ॥ वार्षिकांश्चतुरो
मासान्प्रसुप्ते च जनार्दने ॥ मंचखट्वादिशयनं वर्जयेत् भक्तिमान्नरः ॥ अनृ
तौ वर्जयेज्जायां मांसं मधु परोदनं ॥ पटोलं मूलकं चैव वृंताकं च न भक्षयेत् ॥ इत्या
दि ॥ शाकशब्दश्च दशसु रूढः ॥ मूलपत्रकरीराग्रफलकांडाधिरूढकाः ॥ त्व
क्पुष्पकवकं चैव शाकं दशविधं स्मृतं ॥ इत्युक्तेः ॥ अधिरूढ अंकुरः ॥ आचार
प्रदीपे ॥ वृंताकं च कलिंगं च बिल्वोदुंबरकल्मिस्सटाः ॥ उदरे यस्य जीर्यंति तस्य
दूरतरो हरिः ॥ कल्मिस्सटं दग्धान्नं ॥ जीः सटेति दीर्घपाठे तु भीसटं स्त्रोषामतकं

१२

इति॥धन्वंतरिनिघंटुः॥ तथा॥ निष्पावान्राजमाषांश्च मसूरं संधितानि च॥
वृंताकं च कलिंगं च तुम्बं देवे विवर्जयेत्॥ संधितानि लवणशाकादीनि॥ अ
त्रैव तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायां॥ आषाढपौर्णमास्यां को
किलाव्रतमुक्तं॥ हेमाद्रौ भविष्ये॥ आषाढपौर्णमास्यां तु संध्याकाले उ
पस्थिते॥ संकल्पयेन्मासमेकं श्रावणं प्रत्यहं त्वहं॥ स्नानं करिष्ये नि
यता ब्रह्मचर्ये स्थिता सती॥ भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां द
यामिति॥ अस्य नक्तव्रतत्वात्प्रदोषव्यापिनी ग्राह्या॥ अत्रैव व्यासपू
जोक्ता॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वये तां हरीश्चेत्परैवेति सन्या
सपुष्टतो॥ पौर्णमास्यां श्रावणे कृष्णतृतीयायां श्रवणयुक्तायां विष्णु
पूजोक्ता॥ तदुक्तं हेमाद्रौ विष्णुधर्मोत्तरे॥ तृतीया श्रावणे कृष्णा यास्या
च्छ्रवणसंयुता॥ तस्यां संपूज्य गोविंदं तुष्टिमप्याप्नुयादिति॥२

१९

त्यापादकृत्यं ॥ श्रावणशुक्लातृतीयामधुश्रवाख्यागुर्ज्जरेषु प्रसिद्धा ॥
सा परयुता ग्राह्येति ॥ दिवोदासीये ॥ श्रावणस्य शुक्लचतुर्थ्यां गणपति
व्रते मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ अव्याप्तौ वा पूर्वा ॥ तथा
च बृहस्पतिः ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ मध्याह्नव्यापि
नी सा तु परतश्चेत्परेहनि ॥ श्रावणशुक्लपंचम्यां नागपूजोक्ता ॥ भविष्ये
श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप ॥ द्वारस्योभयतो लेख्या गोम
येन विषोल्बणाः ॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः ॥ गंधपुष्पो
पहारैश्च ब्राह्मणानां च तर्पणैः ॥ ये तस्यां पूजयंतीह नागान्भक्तिपुरः स
राः ॥ न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति ॥ श्रावणशुक्लद्वादश्यां दधि
व्रतं ॥ प्रायुक्तं ॥ तत्र तत्काद्वीनां निषेधः ॥ तत्र दधित्यागो वा ॥ अत्रैव
द्वादश्यां विष्णोः पवित्रारोपणं ॥ हेमाद्रौ विष्णुरहस्ये ॥ श्रावणस्य सि

रोपणे कर्कटे च दिवाकरे ॥ द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतं ॥ द्वा
दश्यां श्रावणे वापि पंचम्यामथवा द्विज ॥ आनुकूल्येषु कर्तव्यं पंचदश्याम
थापि वेति ॥ शिवे तु तत्रैव कालोत्तरे ॥ आषाढांते चतुर्दश्यां नभस्ये नभसोपि
था ॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः सममिति ॥ अधिवासनं तु दीपि
कायां ॥ ६ ॥ गोदोहात रिते काळे सर्वे धुराधिवानमिति ॥ गौणकाल उक्तो रा
मार्चनदीपिकायां ॥ पवित्रारोपणं विधा श्रावणे न भवेद्यदि ॥ कार्तिका
वधि शुक्लास्ते कर्तव्यमिति ॥ नारदः ॥ शुक्लास्तेपीत्यर्थः ॥ तथा ॥ हेमरौप्यता
म्रक्षौमैः सूत्रैः कौशेयपद्मजैः ॥ कुशैः काशैश्च कर्पासं ब्राह्मण्या कर्तितैः
शुभैः ॥ कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ॥ तत्रोत्तमपवित्रं तु
षष्ठ्या सहस्रातैस्त्रिभिः ॥ सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतं ॥ सा
शीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥ साधारणपवित्राणि त्रीणि सूत्रैः

15

समाचरेत्॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं॥ कनिष्ठं तु पवित्रं स्यात्
षट्त्रिंशद्ग्रंथिशोभितं॥ षट्त्रिंशच्चतुर्विंशाद्वादशेति च केचन॥ चतु
र्विंशद्द्वादशाष्टाविति केचिन्मुनयो विदुः॥ हेमाद्रौ विष्णुरहस्ये॥ कनिष्ठं
तंतुभिर्ग्रंथ्यैः सप्तविंशतिभिः शुभं॥ चतुःपंचाशता ग्रंथ्यैस्तन्नाम मध्यमं परं॥
उत्तमं चैव तेनोक्तं शतमष्टोत्तरं शतं॥ शिवविपत्रं तु तत्रैव च तच्छिवागमे॥ एका
दशभिर्वा सूत्रैस्त्रिंशता वाष्टसंख्यया॥ पंचाशता वा कर्तव्यं तुल्यग्रंथ्यंतरा
लकं॥ द्वादशांगुलमानानि व्यासादष्टांगुलानि च॥ लिंगविस्तारयामानि
चतुरंगुलकानि चेति॥ तत्र मंत्रः॥ देवदेव नमस्तुभ्यं गृहाण पवित्रकं॥ प
वित्रीकरणार्थाय वर्षपूजाफलप्रदं॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं
कृतं॥ शुद्धो भूत्वाम्यहं देव त्वत्प्रसादात्सुरेश्वरेति॥ मूलमंत्रेण पुटितेनानेन
दद्यात्॥ प्रार्थना॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः॥ इयं सांव

त्सरीपूजातथास्कंधगलडुध्रुजुगवनमाळायथादेवकौस्तुभेसततंहृदि॥पवित्र
मस्तकेतद्वत्सुंगांचहृदयेवहेति॥एतच्चेनित्यं॥तत्रैव॥नकरोतिविधानेन
पवित्रारोपणंतुयः॥तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम॥तस्माद्भ
क्तिसमायुक्तैःनरैर्विष्णुपरायणैः॥वर्षेवर्षेविधातव्यंपवित्रारोपणंहरे
रिति॥तथा॥पवित्रारोपणंकालेनकरोतिकथंचन॥तदायुतंजपेन्मंत्रंस्तो
त्रंवापिसमाहितइति॥श्रावणशुक्लचतुर्दशीपूर्वविद्धाग्राह्या॥चैत्रशु
क्लचतुर्दशीवत्॥अथोपाकर्म॥तच्चबह्वृचैःश्रावणेकार्यं॥यजुर्वेदैःपौर्ण
मास्यां॥सामगैःहस्तेसूर्येहस्तनक्षत्रे॥एषांखंडत्वेऔदयिकानि
ग्राह्याणि॥एषांग्रहणसंक्रांतिदुष्टत्वेबह्वृचैःश्रावणशुक्लपंचम्यांयजु
र्वेदिभिःभाद्रपदं॥येषांत्वाषाढीउक्तातेतैराषाढ्यांकार्यं॥वाजस
नेयिभिःशुक्लपंचम्यां॥उपाकृतिःशुक्लपंचम्यांकार्याजसनेयिभिरितिवचनात्॥

वाजसनेयियिग्रहणं येषां गृह्ये पंचमी उक्ता तेषामुपलक्षणं ॥ ग्रहसंक्रांतियो
गश्चाहि रात्रावपूर्वे विद्यमान एव दूषको नान्यथा ॥ तथा च गार्ग्यः ॥ अहि रात्र्या
दयस्ताश्चेत्संक्रांतिग्रहणं तथा ॥ उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति
॥ इदं कर्कटस्थे भानौ निषिद्धं ॥ स च निषेधो नर्मदोत्तरभागविषयः ॥ नर्मदो
त्तरभागे तु कर्तव्यं सिंहयुक्तके ॥ कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिण
इति वचनात् ॥ एतच्च शुक्रास्तादावपि कार्यं ॥ प्रथमारंभस्तु तत्र न कर्तव्यः ॥
अधिमासे न भवत्येव ॥ सामगानां त्वधिमासेऽपि भवति ॥ तेषां सिंहस्थे हस्त
र्क्षविधानात् ॥ एतच्च सामगेरपराह्णे कार्यं ॥ इतरैः पूर्वाह्णे ॥ इदं चोपसनो
ऽभवति ॥ अध्यायोपाकर्म इति पदे लोकिके ॥ श्रावण्यां आश्वलाय
नेन श्रवणाकर्मोक्तं ॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति ॥ तत्रास्तमय
पुरस्तात् ॥ अस्तमिते स्थालीपाकं श्रपयित्वेति अस्तमयकाले विधाना

१६

त्कर्मणो यस्य यः कालः इति वचनात्॥ याज्ञिकास्तु पौर्णमासी शुद्धस्यप
र्वोत्यक्षण वचनत्वात्पर्वसंधिदिवसे रात्रौ श्रवणाकर्मानुष्ठानं वदंति॥ अ
त्रैव रक्षाबंधनमुक्तं॥ भविष्योत्तरे॥ ततोपराह्णसमये कुर्यात्पोटलिकां
शुभां॥ कारयेच्चाक्षतैस्तु द्विसिद्धार्थैर्हेमचर्चितां॥ तत्र मंत्रः॥ येन बद्धो बली
राजा दानवेंद्रो महाबलः॥ तेन त्वामभिबध्नामि रक्षे मा चल मा चलेति॥ अ
त्र पराह्णव्यापिनी ग्राह्या॥ श्रावणी दोर्गनवमी दूर्वा चैव हुताशनी॥ पूर्व
विद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनं॥ इति ब्रह्मवैवर्तवचनात्॥ अस्मादेव शेषव
चनात्॥ अन्येष्वपि पवित्रारोपणादिश्रावणीकृत्येषु पूर्वैव ग्राह्या॥ पर्व
स्यां भद्रासत्वे तु तेरस्थामेव रक्षाबंधनं कार्यं॥ भद्रायां द्वे न कर्तव्ये श्रा[illegible]
फाल्गुणी तथा॥ श्रावणी नृपहंति ग्रामं दहति फाल्गुणीति वच
नात्॥ अद्भुतसागरे नारदः॥ मानो सिंहगते चैव यस्य गोः संप्रसूयते॥ मर

णं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥ तत्र शांतिं प्रवक्ष्यामि येन संपद्यते
शुभं॥ आहुतीनां घृताक्तानामयुतं जुहुयात्ततः॥ व्याहृतिभिश्चापि होमः॥
सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणामिति॥ अथर्ववेदिनां तु पू
र्णिमेष्टिः॥ माघे बुधे चेमहिषी श्रावणे वडवा दिवा॥ सिंहे गावः प्रसूयंते स्वा
मिनो मृत्युदायिका इति॥ अत्र उक्ता अमृता शांतिः कार्या॥ श्रावणादिमा
सचतुष्टये कृष्णपक्षे द्वितीयासु अशून्यशयनव्रतं॥ तत्र चंद्रोदयव्यापि
नी याह्या॥ दिनद्वये तत्त्वे सत्त्वे असत्त्वे वा परा॥ चतुर्षु सितपक्षेषु मासेषु
श्रावणादिषु॥ अशून्याख्यव्रतं कुर्याज्जययाप्नुफलाधिकमिति॥ मदनर
त्नोदाहृतवचनात्॥ श्रावणकृष्णतृतीया कज्जलीसंज्ञा सा परेति॥ दिवो
दासीये॥ नभो वद्भुले चतुर्थ्यां बहुलाख्या मध्यदेशे प्रसिद्धा॥ सा च सायाह्न
व्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तौ पूर्वा॥ अत्र गोपूजा यवान्नाशनं च कार्य
मिति दिवोदासीये॥ अस्यामेव चतुर्थ्यां संकटचतुर्थीव्रतं॥ श्रावणे बहुले

७७

पक्षे चतुर्थ्यां तु विधूदये ॥ गणेशं पूजयित्वा तु चंद्रार्घं च प्रदीयते इति ॥ इयं चंद्रो
दयव्यापिनी ग्राह्या ॥ कर्मणो यस्य यः काल इति वचनात् ॥ तत्काले चंद्रार्घ्यदान
विधानं चंद्रोदयव्रते चैवं तिथिस्तात्कालिका स्मृतेति वचनाच्च ॥ दिनद्वये चं
द्रोदयसत्त्वे असत्त्वे वा पूर्वा ग्राह्या ॥ चतुर्थ्यां च तृतीयायां महापुण्यफलप्रदा ॥
कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी ॥ इति ब्रह्मवैवर्तात् ॥ गणेश गौरी
बहुला व्यतिरिक्ताः प्रकीर्तिताः ॥ चतुर्थ्यः पंचमीविद्धा ॥ देवतांतरयोग इति
वचनान्न च तृतीयाविद्धविधायकानि वचनानि दिवात्रिमुहूर्तवेधे स
त्येव प्रवर्तंते न रात्रियोगमात्र इति वाच्यं ॥ रात्रिसाध्यकर्मसु रात्रावपि वेध
स्य जन्माष्टमीप्रकरणे ॥ माधवादिभिर्दर्शितत्वात् ॥ अत एव महालक्ष्मीव्र
तसमापने दिनद्वयेऽष्टम्यां चंद्रोदयव्यापित्वे ॥ कृष्णपक्षेऽष्टमी चैव कृष्ण
पक्षे चतुर्दशी ॥ पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचिदिति वचनात् पूर्ववि
द्धीयाभ्यंतु कैः ॥ हेमाद्रिमदनरत्ने ॥ यानि तु चतुर्थी गणनाथस्य मातृविद्धा

प्रशस्यते॥ मध्याह्नव्यापिनी साह्य परतश्चेत्परेहनीत्यादीनि वचनानि तानि
सिद्धिविनायकादिव्रतविषयाणि॥ तेषु मध्याह्नस्य कर्मकालत्वात्॥ प्रातः
शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपतिवचनात्॥ अत एव माधवेनाम
ध्याह्नस्य कर्मकालत्वमंगीकृत्यैव विनायकव्रते मध्याह्नव्यापिनी ग्राह्येत्यु
क्तं॥ तस्मादुमयत्र चेन्द्रोदये सत्वे असत्वे वा पूर्वैवेति न्याय्यः पंथा इत्यलं वह
ना॥ अथ जन्माष्टमी॥ सा च श्रावणकृष्णाष्टमी॥ पूर्णिमांतमासपक्षे भा
द्रपदकृष्णाष्टमी॥ शुद्धा विद्धा चेदेनद्विधा प्यष्टमी प्रत्येकं द्विधा॥ द्वितीय
दिने सूर्योदयोत्तरं सत्यसती च॥ तादृश्यपि पुनः प्रत्येकं द्विधा॥ रोहिणी
सहिता रहिता च॥ तत्र शुद्धायां विद्धायां वा द्वितीयदिने सूर्योदयादूर्ध्वम
सत्यां विवाद एव नास्ति॥ द्वितीयदिने अष्टम्यभावात्॥ शुद्धाधिकायां वि
द्धाधिकायां वा एकस्मिन्नेव दिने रोहिणीयोगे सैव रोहिणीयुता सैव ग्राह्या
दिनद्वये पि रोहिणीयोगे अर्धरात्रे तद्योगवती ग्राह्या॥ अर्धरात्रे तु योगा

यं नारापत्य दयेसतीति॥ विष्णुधर्मोत्तरे॥ दिनद्वयेप्यष्टरात्रं विहाय रोहिणी
योगेसप्तमीविद्धा निषिध्यान्नवमीयुक्ता या॥ ज्ञाशात्या दुत्तरा यात्या॥ दिन
द्वयेपि रोहिणीयोगाभावेऽष्टरात्रव्यापिनी यात्या॥ अष्टरात्रस्य कर्मकाल
त्वात॥ दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला॥ रात्रियुक्तां प्रकुर्वीत
विशेषेणेंदुसंयुताम् इति वचनात॥ इयं चेन्नित्या॥ वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं
चक्रपाणिन इति वीप्साश्रवणात॥ अकुर्वन्नरकं याति यावदिंद्रा चतुर्दश
इति॥ अकरणे प्रत्यवायश्रवणाच्च॥ काम्यं चेदं फलश्रवणात॥ तथा च स्कां
दे॥ सिद्ध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रतेति॥ पारणं तु केवलाष्टम्युप
वासे तिथ्यंते॥ रोहिणीयुक्ताष्टम्युपवासे तु उभयांते कर्तव्यमिति मुख्यः
पक्षः॥ अन्यतरांतो गौणः॥ यदि तु उभयोरन्यतरस्य वा तत्सदा रात्रा
वपि पारणं कार्यं॥ न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात॥ तत्र निशापि
तत्कुर्याद्वर्जयित्वा महानिशामिति वचनात॥ अत्य शक्तेनेउत्सवांते का

र्यं॥ माधवेन तु यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति वचनं लिखि-
त्वा तदनुसारेणैव निर्णयः कृतः॥ श्रीकृष्ण॥ देवकीवसुदेव॥ नंद॥ यशो-
दादिप्रतिमानिर्माणतत्पूजाप्रकारविशेषादि॥ कालतत्वविवेचने
द्रष्टव्यं॥ विस्तरभयान्नेह लिख्यते॥ संकल्पमंत्रस्तु॥ वासुदेवं समुद्दिश्य
सर्वपापप्रशांतये॥ उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यमिति॥ चंद्रा-
र्घमंत्रस्तु भविष्ये॥ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव॥ गृहाणार्घ्यं शा-
शांकेदं रोहिण्या सहितो मम॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां
पते॥ नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतामिति॥ श्रावणामावास्या-
यां कुशग्रहणमुक्तं हेमाद्रौ हारीतकेन॥ मासे नभस्यमावास्या तस्यां द-
र्भोच्चयो मतः॥ अयातयामास्ते ज्ञेया विनियोज्याः पुनः पुनरिति॥ नभाः श्राव-
णः दर्भीत पदैणदं॥ मदनरत्ने तु॥ मासे नभस्यमावास्या तस्यां दर्भो-
च्चयो मतेति॥ मरीचेर्वाक्यमुदाहृतं॥ तत्पूर्णिमांतमासाभिप्रायेणेति हो-

रीतेनएकषाकार्तव्या ॥ इति श्रावणः ॥ भाद्रपदशुक्लतृतीयायां हरितालिका
व्रतं ॥ तत्र सा परा ॥ रंभाख्यं वर्जयित्वा तु तृतीयां द्विजसत्तम ॥ अन्येषु सर्वकार्ये
षु गणयुक्ता प्रशस्यते ॥ ब्रह्मवैवर्ते ॥ तृतीया तु न कर्तव्या द्वितीयासंयुता
तिथिरिति स्कांदे ॥ द्वितीयायुक्ताया निषेधात् ॥ निषेधप्रयोजकस्य द्वितीयावे
धो न त्रिमुहूर्तः किंतु कलाकाष्ठादिरूपोपि ॥ तदुक्तं स्कांदे ॥ कलाकाष्ठापि वा चे
द् द्वितीया संप्रदृश्यते ॥ सा तृतीया न कर्तव्या कर्तव्या गणसंयुतेति ॥ अत एव स्व
ल्पापि तृतीया चेत्तु परयुक्ता एकादशीवज्ज्ञेया ॥ अयं चाल्पवेधप्रयुक्तो निषे
धो गौरीव्रतविषयः ॥ विहाय कौतुरंभाख्यामिति पर्युदासेन तत्सदृशानामेव व्र
तानां तत्र प्रतीतेः ॥ न त्वेवं युक्तं मन्यसे दृश्यं यदि तेन्यावा तत्र वैशिष्ट्यमा
चारश्चेति ॥ भाद्रशुक्लचतुर्थ्यां सिद्धिविनायकव्रतं ॥ स्कांदे ॥ कृष्ण उवाच ॥
गजवक्त्रं तु शुक्लायां चतुर्थ्यां पूजयेन्नृप ॥ यदा चोत्पद्यते भक्तिस्तदा पूज्यो
गणाधिपः ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप ॥ स्वशक्त्या गण
नाथस्य स्वर्णरौप्यमथा वेति ॥ अथवा मृन्मयीं कुर्याद्वित्तशाठ्यं न कारयेत् ॥

गणनाथस्य सिद्धिविनायकस्य ॥ तस्य रूपमुक्तं तत्रैव ॥ एकदंतं शूर्पकर्णं गज
वक्त्रं चतुर्भुजं ॥ पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकमिति ॥ एवं प्रतिमां कृ
त्वा प्राणप्रतिष्ठां कुर्यात् ॥ तद्विधिः कालिकापुराणे ॥ प्रतिमायाः कपोलौ
द्वौ स्पृष्ट्वा दक्षिणपाणिना ॥ प्राणप्रतिष्ठां कुर्वीत तस्या देवस्य साधकः ॥ अकृ
तायां प्रतिष्ठायां प्राणानां प्रतिमासु च ॥ यथापूर्वं तथाभावः स्वर्णादीनां न देव
ता ॥ अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ॥ प्राणप्रतिष्ठा कर्तव्या तस्या दे
वत्वसिद्धये ॥ अथ प्राणप्रतिष्ठाप्रयोगः गणेशप्रतिमायाः कपोलौ दक्षिणपा
णिना स्पृष्ट्वा ॐ गणानां त्वेति मंत्रं पठित्वा गणेशाय प्राणाः प्रतिष्ठन्तु गणे
शाय प्राणाः क्षरंतु च ॥ गणेशाय देवत्वसंख्यायै स्वाहा ॥ अन्यदेवेषु तद्वीज
मेवोपठित्वा चतुर्थ्यं देवतापदयुक्तं पूर्वोक्तमंत्रं पठेदिति ॥ ततः ॥ कृत्वा पूजां
प्रयत्नेन स्नाप्य पंचामृतैः पृथक् ॥ गणाध्यक्षेति नाम्नावै गंधं दद्याच्च भक्ति
तः ॥ विनायकाय प्रतिपुष्पाणि धूपं चोमासुतेति च ॥ दीपं लंबोदरायेति नैवेद्यं
विघ्ननाशिने ॥ वस्त्रं सर्वप्रदेत्युक्तं युग्मं दद्यात्सुभावितः ॥ ततो दूर्वांकुरान्

र्द्धविंशतिं चैकमेव च ॥ पूजनीयः प्रयत्नेन एभिर्नामपदैः पृथक् ॥ ततो निवेद्यं
ततो ॥ दूर्वायुग्मं गृहीत्वा तु गंधपुष्पैः प्रपूजयेत् ॥ एकैकेन च नाम्ना वै दद्यादेकं स
र्वनामभिः ॥ ततश्चैकविंशतिं गृह्य मोदकान् घृतपाचितान् ॥ स्थापयित्वा गण
ध्यक्षस्य समीपे कुरुनंदन ॥ दश विप्राय दातव्याः स्वयं चाद्यात्तथा दश ॥ एकं
गणाधिपे दद्यान्नैवेद्यं नृपोत्तम ॥ विप्राय भोजनं दद्यात् दुंगीयात्तैलवर्जि
तमिति ॥ अथ संक्षेपेण प्रयोगः ॥ प्रातः कृतनित्यक्रियः सूर्यादिदेवताभ्यो
व्रतं निवेद्योदङ्मुखो वारिपूर्णताम्रपात्रं गृहीत्वा मम सर्वकर्मनिर्विघ्नसि
द्धिपुत्रसौभाग्यसंपत्प्राप्तिद्वारा श्रीगणेशप्रीत्यर्थं सिद्धिविनायकव्रतं
करिष्य इति संकल्प्य प्रतिमां कृत्वा प्राणप्रतिष्ठां कृत्वा आवाहनादि कृत्वा
पंचामृतैः पृथक् स्नानं ॥ गणाध्यक्षाय नमः ॥ गंधं समर्पयामि ॥ विना
यकाय नमः ॥ पुष्पं ॥ उमासुताय नमः ॥ धूपं ॥ रुद्रप्रियाय दीपं ॥ विघ्नना
शिने नमः ॥ एकमोदकसहितं नैवेद्यं ॥ दत्वा एकविंशति दूर्वाः संगृह्य

हीत्वा एकैकेन नाम्ना दूर्वायुग्मं दद्यात् ॥ तद्यथा ॥ गणाधिपाय नमः ॥ दूर्वा
युग्मं समर्पयामि ॥ उमापुत्राय नमः दूर्वा ॥ अघनाशनाय० दूर्वायु० ॥ विनायका
य नमः दूर्वायु० ॥ ईशपुत्राय० दूर्वा० ॥ सर्वसिद्धिप्रदायकाय० दूर्वा० ॥ एकदंता
य० दूर्वा० ॥ इभवक्त्राय नमः दूर्वायु० ॥ मूषकवाहनाय० दू० ॥ कुमारगुरवे०
दू० ॥ तेनोच्छिष्टा मे कां गणाधिपेत्यादि ॥ १० ॥ नामभिः समर्पयामि ॥ एक
विंशतिमोदकान् गणेशाय स्थाप्य दश ब्राह्मणाय सदक्षिणान् दत्वा ब्राह्म
णाय त्वेजने दत्वा स्वयं दशमोदकसहितं तच्चतुर्थ मध्याह्नव्यापिनी ग्रा
ह्या ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति ॥ स्कंदपुराण ॥ मध्या
ह्नस्य कर्मकालत्वाभिधानात् ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्य
ते ॥ मध्याह्नव्यापिनी सा तु परतश्चेत् परेहनीति ॥ वचनाच्च ॥ अत्र परतश्चे
दिति परदिन एव मध्याह्नव्यापित्वे परा ॥ अन्यथा सर्वपक्षेषु पूर्वा ॥ मा
तृयोगस्य प्रशस्तत्वात् ॥ अस्यां चंद्रदर्शनं न कर्तव्यम् ॥ तथा मार्कंडेयः ॥

२१

सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्रदर्शने ॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पु
श्येन्नेतं सदा ति ॥ पुराणांतरे ॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शने ॥ मि
थ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ॥ दोषस्य शांतये सिंहः प्रसेनमि
ति वै पठेत् ॥ अत्र सिंहादित्यकन्यादित्यशब्दाभ्यां चांद्रो भाद्रपद उपलक्ष्य
ते ॥ श्लोकः स्कंदविष्णुपुराणे ॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सु
कुमारक मा रोदीस्तव ह्येष स्यमंतकः इति ॥ भाद्रशुक्लपंचमी ऋषिपंच
मी सा सामान्यनिर्णयात्पूर्वा ॥ उत्तरत्रैव मध्याह्नव्यापित्वे उत्तरा मनुष्य
दैवत्यत्वेन मध्याह्नकालव्याप्तेः ॥ भाद्रपदशुक्लसप्तम्यामुक्ताभरणव्रतं ॥
तत्र सप्तमी पूर्वविद्धा ग्राह्या ॥ षण्मुन्योरिति युग्मवाक्यात् ॥ भाद्रपदशु
क्लाष्टमी दूर्वाष्टमी ॥ सा च पूर्वविद्धा ग्राह्या ॥ श्रावणी दौर्गनवमी दूर्वा
चैव हुताशनी ॥ पूर्वविद्धैव कर्तव्या इति ॥ ब्रह्मवैवर्तवचनात् ॥ शुक्लाष्टमी
तिथिर्यस्तु मासि भाद्रपदे भवेत् ॥ दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधी

यतेति॥ हेमाद्र्यदाहृतपुराणसमुच्चयवचनाच्च॥ इयंच दूर्वाव्रतं ज्येष्ठा
मूलयोगरहितायां सिंहस्थे सूर्ये अगस्त्यानुदिते मध्याह्नव्यापिन्यां क
र्तव्यं॥ उक्तं भाद्रपदे मासि दूर्वासंज्ञा तु याष्टमी॥ सिंहार्क एव कर्तव्या न
कन्यार्के कदाचन॥ सिंहस्थे भानौ मासि सूर्ये अनुदिते मुनिसत्तमे ॥ इति स्कां
दात्॥ अगस्त्ये उदिते तातं पूजयेद्यदि मानवः॥ वैधव्यं पुत्रशोकं च दद्याद्वर्षा
णि पंचचेति तत्रैव दोषाभिधानाच्च॥ मुहूर्तं रोहिणी चेत्स्यात्पूर्वा वा वाय
दि वा परा॥ दूर्वाष्टमी तु सा कार्या ज्येष्ठामूलं च वर्जयेत्॥ इति पुराणस
मुच्चये॥ तथा॥ ऐंद्रे दैवे पूजिता दूर्वा हंत्यपत्यानि नान्यथा॥ मूलर्क्षे रापूर्ता
मूलेन तस्यां तां परिवर्जयेदिति॥ निषेधाच्च॥ इदं च स्त्रीणां नित्यं॥ यानपूज
यते दूर्वां मोहादिह यथाविधि॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशो
यः॥ तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः॥ सर्वसंतानजननी भक्त्या
सौख्यकरी सदेति॥ पुराणसमुच्चयोक्तेः॥ तेन पूर्वस्यां ज्येष्ठायोगे न्यतरस्या

२२
म॰ १

गेऽङ्गारापितदुहिताकर्मकालस्पर्शनानीदूर्वाव्रते ग्राह्या॥ नित्यत्वाच्च यस्मि-
न्वर्षे ज्येष्ठामूलयोगरहितायां अलाभस्तत्राप्यनुकल्पेनानुष्ठानं न तु सर्व-
थात्यागः॥ अनुकल्पश्च कर्तव्यात्वेकमुक्तेन ज्येष्ठामूलं छेपदामवेत॥ दूर्वा-
मभ्यर्च्य यद्कृत्वा नवेध्यं दिवसं नयेदिति॥ तत्रैवोक्तं॥ ज्येष्ठामूलाय हेणोनु-
षिद्धकालमात्रापकर्षणं॥ तत्राप्युपदासत्वात्॥ अत्र केचित्यमुक्तं मदनरत्ने
नविष्णुः॥ शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणो व्रतेन॥ स्थाप्य लिङ्गं ततो गन्धैः
पुष्पैर्धूपैः समर्चयेत्॥ दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने॥ दूर्वाश-
मीभ्यां विधिवत्पूजयेच्छ्रद्धयान्वितः॥ मन्त्रस्तु॥ त्वं दूर्वेऽमृतजन्मासि वन्दिता-
सि सुरासुरैः॥ सौभाग्यं संततिं देहि सर्वकार्यकरी भव॥ यथा शाखाप्रशा-
खाभिर्विस्तृतासि महीतले॥ तथा ममापि संतानं देहि त्वमजरामरे इति।
अत्र अनग्निपक्वं भक्षयेत्॥ अनग्निपक्वमश्नीयाद्दधि दधिफलं तथा॥
अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितमिति॥ अत्र निषिद्धयोगाभा

वेस्त्रीभिः स्वयं देवीं संपूज्य अनन्निप वस्त्रेक्षणं कार्यं ॥ तद्योगे ब्राह्मणद्वारा
पूजां कारयित्वा एकभक्तं कार्यं ॥ अस्यामेव ज्येष्ठापूजा कार्या ॥ कन्यास्थार्को
ष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपू
जयेदिति ॥ लिंगपुराणात् ॥ अत्र कन्यास्थार्कयोगे न प्राशस्त्यमात्रं ॥ मास
संज्ञा भाद्रपदश्चाद्य एव ॥ अत्राष्टम्याः खंडत्वे ज्येष्ठायुता पूर्वा परा ग्राह्या ॥
यतो ज्येष्ठानक्षत्रमात्रापेक्षं तिथितिथिव्रतादिभ्यं ज्येष्ठापूजास्वरूपं व्रतं तद्य
स्यां तिथौ ज्येष्ठानक्षत्रं भवति तस्यां कर्तव्यं ॥ मासि भाद्रपदे शुक्ले पक्षे
ज्येष्ठर्क्षसंयुते ॥ यस्मिन्कस्मिन्दिने वापि ज्येष्ठादेवीं प्रपूजयेदिति ॥ स्कंद
पुराणात् ॥ यस्मिन्कस्मिन्दिने यस्यां कस्यांचित्तिथावित्यर्थः ॥ ज्येष्ठानक्ष
त्रस्य खंडत्वे मध्याह्नव्याप्तिमनुवर्तमाने ग्राह्यं यस्मिन्दिने भवेज्ज्येष्ठा म
ध्याह्नात्पूर्वमपराण्हे तस्मिन्नेव विधिः प्रोक्तो चेन्न्यूना चेत्पूर्ववासरे इति ॥ २३
इति स्कांदोक्तेः ॥ तथा-मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ॥ मूलेन विस

र्ये देवी त्रिदिने बत्तमुत्तमामिति ॥ मेत्रस्था ॥ ज्येष्ठायै तेन मस्कंपं ज्येष्ठा
यै तेन मो नमः ॥ २ ॥ श्रीदायै तेन मस्कंपे शाकंर्यै तेन मो नम इति ॥ अस्यामेव
महालक्ष्मीव्रतारंभः ॥ तत्र साज्येष्ठायुता ग्राह्या ॥ तदुक्तं वैकेचित् ॥ भा
द्रशुक्लद्वादस्यां श्रवणयोगे पारणं न कर्तव्यं ॥ आ भाका सितपक्षे द्विति
पूर्वी दाहृतवचनात् ॥ उपोष्यकादशीं मोहात्पारणं श्रवणे यदि करोति
हंति तत्पुण्यं द्वादशद्वादशीभवं ॥ स्कांदाच्चे ॥ अत्र चैत्रे धाविमक्षश्रवण
मध्यभागे एवं पारणं वर्ज्यमित्युक्तं ॥ विष्णुधर्मे ॥ ऋक्षे तेश्च मध्ये परिवर्त
मेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यं इति ॥ अत्रैव परिवर्तनोत्सवं कुर्या
त् ॥ ऋक्षे तेश्च मध्ये परिवर्तमेतीति वाक्यात् ॥ अत्रैव शक्रध्वजोत्थापनमु
क्तं मपराके गर्गेण ॥ द्वादश्यां तु सितेपक्षे मासि प्रोष्ठपदे तथा ॥ शक्र
मुत्थापयेद्राजा विश्वश्रवणवासवे इति ॥ इयमेव श्रवणद्वादशी ॥ अ

स्याश्चाल्पश्रवणयोगेपितन्निमित्तमुपवासादि भवति॥ तदुक्तं मात्स्ये॥
द्वादशीश्रवणस्पृष्टा कृत्स्नपुण्यतमा तिथिः॥ न तु सा तेन संयुक्ता तावत्ये
व प्रशस्यत इति॥ तत्र एकस्मिन्नेव दिने श्रवणयोगे येवं श्रवणयुतासेव
यात्वा॥ विद्धाधिकायादिनद्वयेपि श्रवणयोगे एकादशीयुतायात्वा॥
द्वादशीश्रवणस्पृष्टा स्पृशेदेकादशीं यदा॥ स एव वैष्णवो योगो विष्णुशृं
खल संज्ञितः॥ उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः॥ प्राप्नोत्यनुत्तमां
सिद्धिं पुनरावृत्तिदुर्लभामिति॥ मत्स्यपुराणात्॥ तथा नारदीये॥ संस्पृ
श्येकादशीं राजन्द्वादशी यदि संस्पृशेत्॥ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महः
त्यां व्यपोहतीति॥ तत्रैणाचतदेकादशी प्रयुक्तमुपवासद्वयं॥ शुद्धाधि
यादिनद्वयेपि श्रवणयोगे उदये तद्योगवती ग्राह्या॥ उदयव्यापिनी
त्वा॥ श्रवणद्वादशीव्रत इति॥ बृहन्नारदीये॥ यदा तु एकादश्येव श्रवण

२४

युक्ता तद्वादशी तदा तस्यामपि भुक्तं भवति॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्ण
वं क्वचित्॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्वितेति॥ नारदीयात्॥ विद्धा
या एवं श्रवणायोगेपि विद्धापि त्याज्या॥ दशम्येकादशी विद्धा सा नोपोष्या
न वेति स्थितिः॥ श्रवणेन तु संयुक्ता साष्टभा सर्वकामदेति॥ वह्निपुराणात्॥ इ
ये चेव बुधवारेति पद्मपुराणात्॥ अत्र व्रतं काम्यं॥ नित्यमिति केचित्॥ पारणमुभयपो
तो मुख्यः॥ अन्यतरान्ते गौणः॥ अत्र संगमस्नानादिकार्यं॥ भाद्रपदे श्रवणे
काद्रश्यां मध्याह्ने वामनावतारः॥ तत्र वामनपूजा व्रतं स्नानदानादिकं॥ व्रत
काडे द्रष्टव्यं॥ अस्यामेव दुग्धव्रतसंकल्पः॥ दुग्धव्रते पायसादिकं वर्ज्यं॥
दधिघृतादयस्तु द्विकारात्मकत्वात् ग्राह्या एव॥ भाद्रपदशुक्ले चतुर्दश्यामनंतव्र
तं॥ तत्र पूर्वाह्णव्यापिनी ग्राह्या देवकर्मत्वात्॥ चतुर्दश्याश्च पौर्णिमेति युग्मवा
क्यात्॥ केचित्तु मध्याह्ने भोज्यवेलायामिति तत्कथायां श्रवणान्मध्याह्ने व्या
पिनी ग्राह्येति वदंति॥ एतस्य दूषणं मत्पुत्रे मत्कौतुके द्रष्टव्यं॥ सिंहसंक्री
ति दिनमारभ्यैकविंशतिमे दिने ऽगस्त्योदयः॥ तदुक्तं दिवोदासीये॥ उदे

तिथ्यां हरिभाद्रपदे रेवत्यां कार्त्तिके विंशति मेत्याऽगस्त्ये ति॥ तत्र काशपुष्पमयीमग
स्त्यप्रतिमां संपूज्य अगस्त्यः॥ खनेनानइत्यृचो अर्घ्यं दद्यादित्यादि व्रतकोडे
स्पष्टं॥ भाद्रपदे पौर्णमास्यां प्रपितामहोत्परांस्त्रीनुद्दिश्य श्राद्धं कार्यं तदुक्तं
मार्कंडेयपुराणे॥ नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ॥ पौर्णमास्यां तु
कर्तव्यं॥ वराहवचनेयपि॥ नांदीमुखा वदंति तत्रैव॥ पितापितामहश्चैव
तथैव प्रपितामहः॥ त्रयोऽश्रुमुखा ह्येते पितरः परिकीर्तिताः॥ तेभ्यः पूर्व
तरा ये च प्रजावंतः सुखैधिताः॥ ते तु नांदीमुखा नांदी समृद्धिरिति कथ्यते ति॥
एतच्च नित्यं॥ प्रत्यब्दमित्युक्तेः॥ एतच्चेपार्वणविधानेन कार्यं॥ अथ महाल
यः॥ तत्र षट् पक्षाः॥ कृष्णप्रतिपदादि शुक्लप्रतिपदंत एकः॥ प्रतिपदादिद
र्शांतो द्वितीयः॥ पंचम्यादि॥ अष्टम्यादि॥ दशम्यादि चतुर्दशीवर्जदर्शांत
मित्यपरे दर्शसमाप्ताः पंचतिथिपक्षाः॥ एकदिनपक्षश्चेति॥ तत्र प्रथममाह
शातातपः॥ नभस्यस्यापरेपक्षे तिथिषोडकस्तु यः॥ कन्यागतान्वितश्चेत्
स्यात्सकालः श्राद्धकर्मणीति॥ चेदित्यसंदिग्धेऽसंदिग्धवचनं॥ तिथिषो

डशाकं यत्तु मुक्तप्रतिपदा सह ॥ चतुर्दश्यां विषेणैवौ मासि दर्शा त्विका स्मृतेति
॥ पंचदशाद्दशास्त्रमपचेतिथिपदाः ॥ ब्रह्मपुराणे ॥ अश्वयुक्कृष्णपक्षे तु श्रा
द्धं कुर्याद्दिने दिने ॥ त्रिभागपक्षहीनं वा त्रिभागत्वर्द्धमेव वा ॥ इति गततायो भा
गं त्रिभागः पक्षस्य ॥ तद्धीनता च आद्यानां चतस्णां चतुर्दश्याश्च वर्जनात्तो
एवमह्नस्त्रिभागयोरपि चतुर्दशीवर्जने ॥ नभस्यस्यापरे पक्षे श्राद्धं कुर्याद्दिने
दिने ॥ निवनंदादिवर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति वचनेन प्रतिपदादिपक्षे ए
व चतुर्दशीवर्जनं निषेधादितरपक्षेषु तद्वर्जनं प्रतीतेः ॥ नदातिवर्जनमेवति
सख्या हानिः प्रसंगात् ॥ गौतमः ॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्या
दि दर्शांतं अष्टम्यादि दशम्यादि सर्वस्मिन्वेति ॥ एकादिने पक्षे नागरखंडे ॥ आ
षाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे ॥ यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वा
सरे ॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति ॥ अस्मिंश्च पक्षे नंदादिवर्ज
नं भवति ॥ अत्र तदप्रवृत्तौ कारणाभावात् ॥ नंदादिवर्जने माह नारदः ॥ ननंदासु
देगोदारे रोहिण्यां च त्रिजन्मसु ॥ रेवत्यां च मघायां च कुर्याद्दापरपाक्षिकमिति ॥

नंदा प्रतिपत्षष्ठ्यो कादश्यः॥त्रिजन्मनि आद्यदशमे कोनविंशाश्विनक्षत्राणि॥ यतु॥ कुर्तुश्च पुत्रदाराणां त्रयाणि त्रीणि जन्मदशाणि आद्यदशमे कोनविंशानि तानि वर्जयेत् इति॥ अन्यथा त्रिशकृत्स्य बहुवचनस्य वैयर्थ्यात॥ केचित्त्रिजन्म नीत्यत्र जन्मतत्पूर्वोत्तर नक्षत्राणीति व्याख्यातत्पूर्वोत्तरनक्षत्रयोर्जन्मशब्द वाच्यत्वाभावादुपेक्षिते॥ अन्यत्रापि॥ नंदाश्च कार्म्यारव्यार भग्वग्निपितृकाल मे॥ गंडे वैधृते पाते च पिंडास्त्यान्या :सुतै प्सुभिरिति॥ अथ समर्पो॥ कामत्रे योदशी॥ आरोमोमः॥ अग्निपितृकालभानि कृतिकामघाभरण्याख्यानि नक्षत्राणि॥ पिंडदानयहणं श्राद्धोपलक्षणं मेवं च कम्बलकल्पनालाघवात॥ अस्यापवादः॥ योगपारिजाताहृतेसंग्रहवचने॥ समापाते भरण्यां च द्वादश्यां पक्षमध्यके॥ तिथिवारं च नक्षत्रं योगं च न विचारयेदिति॥ मृततिथि समानजातीयायामपि चतुर्दशी त्रिपात्रयाति थौनिषेधप्रयोजकयुक्तायामपि या वत्संभवे शिष्टा महाळयश्राद्धमाचरंति॥ आधुनिकग्रपवचनान्यपि लिखि तानि॥ नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ मृताहनि प

२६

तुर्ये वै श्राद्धं दास्यति मानवः॥ तस्य संवत्सरं यावत्त्वं तु छागः पितरो ध्रुवमिति॥ का
त्यायनः॥ यो तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते॥ सा तिथिः पितृपक्षे तु पूज
नीया प्रयत्नतः॥ तथा॥ अशक्तः पक्षमध्ये करोत्येकदिने यदा॥ निषिद्धेपि
दिने कुर्यात्पिंडदानं यथाविधीति॥ तथा मार्कंडेयः॥ कन्यागते सवितरि
दिनानि दश पंच च॥ पार्वणेन वै विधिना श्राद्धं तत्र विधीयते॥ तथा॥ विवाहे
विहिते मासात्स्यपत्यहा दशैव हि॥ सपिंडाः पिंडनिर्वापं मौंजीबंधे षडेव हि
ति॥ विवाहाद्यनंतरं पिंडदाननिषेधः॥ ज्योतिःपराशरे एतत्॥ तस्यापवाद
स्मृतिसंग्रहे॥ महालये गयाश्राद्धे मातापित्रोर्मृतेहनि॥ यस्य कस्यापि मर्त्य
स्य सपिंडीकरणे तथा॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुत इति॥ सन्या
सिनां तु महालयश्राद्धं द्वादश्यां कर्तव्यं॥ यतीनां च वनस्थानां वैष्णवानां वि
शेषतः॥ द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषत इति॥ पृथ्वीचंद्रोदये संग्रहे
कैः॥ इदं चान्नेनैव कर्तव्यं॥ मृताहं च सपिंडं च गयाश्राद्धं महालयं॥ आपन्नो

पिनकुर्वीत श्राद्धमानेन कर्हिचिदिति॥ स्मृतिदर्पणे गालवोक्तेः॥ अथान्नदेव
ताः॥ पितरो यत्र पूज्यंते तत्र मातामहा अपि॥ तथा॥ अन्वष्टकासु वृद्धौ च प्रति
संवत्सरे तथा॥ महाळये गयायां च सपिंडीकरणात्पुरा॥ मातुः श्राद्धं पृथक्कु
र्यादन्यत्र पतिना सह॥ हेमाद्रौ॥ महाळये गयाश्राद्धे वृद्धौ चान्वष्टकासु च॥
नवदैवतमत्रेष्टं षाट्पौरुषं विदुरिति॥ सापत्नमात्रा सह कर्तव्येणाद्धि पितृके
श्राद्धे वैतेन निरामे॥ महालये गयाश्राद्धे श्राद्धे चान्वष्टकासु च॥ द्वादश
दैवत्यं तीर्थे प्रोष्ठपद्यामास्तु च॥ तथा हेमाद्रौ॥ उपाध्यायगुरुश्वश्रूपितृव्याचार्य
मातुलाः॥ श्वशुरभ्रातृतनयपुत्र ऋत्विक्शिष्याप्तपोषकाः॥ भगिनीस्वामिदु
हितृजामातृभगिनीसुताः॥ पितरो पितृपत्नीनां पितृमातृश्वस्राश्वसाः॥ सर्
खि च द्रव्यशिष्याद्याः स्त्रीत्वे चैवं महालये॥ एकोद्दिष्टविधानेन पूजनीया
प्रयत्नतः इति॥ मातामहतिसंग्रहवाक्यं तु ऋषिवचनसंवादान्नादृतं॥ अत्र प ॥२७॥
त्येकोद्दिष्टं ब्राह्मणभेदेतिमुख्यः पक्षः॥ अशक्तौ तु चतुर्विंशतिमतं॥ एक

स्मिन्ब्राह्मणे सर्वोनाद्याचार्यादीनपूजयेत्॥ दशाहादर्वाक्पिंडान्दद्यादेकेनान्तु
तु॥ विधवायास्त्वविशेषः स्मृतिसंग्रहे॥ चत्वारि पार्वणानीह विधवायाः सदे
वहि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ श्राद्धदानमुपक्रमेदिति॥
तथा॥ श्वश्रूणां च विशेषेण मातामह्यास्तथैव चेति॥ अशक्तौ स्मृतिरत्ना
वल्यां॥ स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च॥ विधवा कारयेच्छ्राद्धं यथा
कालमतंद्रिता॥ विधवा स्वयं संकल्पं कृत्वान्यद्वारा कारयेदित्युक्तं प्रयो
गपारिजाते॥ अत्र चैकः पाकः वैश्वदेवतंत्रं एकोद्दिष्टे पाणिहोमः॥ पुरू
रवार्द्रवसंज्ञकौ विश्वेदेवौ॥ यत्तु कन्यागते सूर्ये श्राद्धं तु धुरिलोचनावित्यादि॥
पुराणवचनं तत् काम्यबुध्या क्रियमाणमाहालयश्राद्धविषयमिति मदन
रत्नमदनपारिजातादयः॥ अत्र चद्वितिदिनं प्रयोगभेदाद्दक्षिणाभेदः॥ यत्तु
हेमाद्रिणाभ्यासपक्षे तद्दक्षिणाप्रदानमित्युक्तं॥ तत्कर्मैक्येपि प्रतिदिनं
प्रयोगभेदाद्दक्षिणाया अप्रयोगांगत्वादयुक्तं॥ एतच्चेगुर्विण्यां पतिनापि

डरहितं कार्यं ॥ तथा च दक्षः ॥ मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवपि
तृकः कुर्याद्गुर्विणीपतिरेव चेति ॥ जीवत्पितृकस्यान्वष्टक्यमातृवर्षिकादौ
वचेनाद्भवेति ॥ अथ सपिंडकश्राद्धे विशेषमाह छागलेयः ॥ पिंडो यत्र निव
र्तेत महालयादिषु कथं चन ॥ तत्र कल्पं तु तदा कार्यं नियमात् ब्राह्मणादिभिः ॥ श्राद्धा
गते पर्वणं तु पक्षश्राद्धे श्राद्धोत्तरं सकृन्महालयेषु परदिने ॥ तदुक्तं नोदीये ॥
पक्षे श्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ॥ सकृन्महालये चैव परेहनि तिलोद
कमिति ॥ प्रयोगपारिजाते शंखः ॥ कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ॥
पितॄणां प्रत्यहं कार्यं निषिद्धेपि च तर्पणं ॥ एतच्च श्राद्धं नित्यं ॥ आषाढ्याः पंच
मे पक्षे यः श्राद्धं न करिष्यति ॥ तस्य केनापि दारिद्रो पितृलो त्यजेत्युपेष्यति ॥ आ
सनं शयनं तेन स्पर्शनं भाषणं तथा ॥ तेन सार्द्धं करिष्यति ये ते पापनरा इ
ति ॥ नागरखंडे ॥ अकरणे प्रत्यवायश्रवणात् ॥ काम्यं वा ॥ पुत्रायुस्तथारोग्य
मैश्वर्यमतुलं तथा ॥ प्राप्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलानिति कात्या

२८

जिनवचनात्॥ मळमासेत्यक्तषे॥ पातुधान प्रियोमासः कन्यार्केजायतेय
दा॥ दैवे पित्र्ये तदा कर्म उत्तरे मासि युज्यते॥ पितृमरणप्रथमाब्दे तु कृता
कृते॥ अत्र भरण्याश्राद्धमतिप्रशस्तं॥ भरणी पितृपक्षे तु महती परिकीर्ति
ता॥ तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेदिति मात्स्यात्॥ पृथ्वीचंद्रोदये
नमस्यापरपक्षे स्याद्द्वितीयायदि या स्पृता॥ तृतीयात्वग्निता रोमिः सहिताप्री
तिदा पितृतृप्ति॥ अस्मिन्नेव पक्षे कपिलाषष्ठी॥ तदुक्तं वाराहे॥ नमस्यकृष्ण
पक्षे तु रोहिणीपात संयुते॥ युता षष्ठी पुराणज्ञैः कपिलापरिकीर्तिता॥ व्र
तोपवास नियमैर्भास्करं तत्र पूजयेत्॥ कपिलां च द्विजाग्र्याय दत्वा क्रतुफल
लभेत्॥ अत्रे ब्रहस्त्राकेफलामिशाये इति निर्णयामृते॥ इयमेव चंद्रषष्ठी॥ त
दुक्तं भविष्ये॥ भाद्रे कृष्णपदे मासि षष्ठ्यां पक्षे सितेतरे॥ चंद्रषष्ठीव्रतं कुर्यात्पू
र्वविद्धा प्रशस्यते॥ चंद्रोदये यदा षष्ठी पूर्वापरेह्ननि॥ चंद्रषष्ठ्युसितपक्षे
सैवोपोष्या प्रयत्नेनेति॥ अत्रैव षष्ठ्यामाश्वलायनैर्नमोध्यावर्षसङ्क्षो

ह्लमुक्तं ॥ एतेन माध्यावर्षे ज्येष्ठपक्षाऽपरपक्ष इति ॥ इदं च समन्पादि षुत्रि
षु हः सुअष्टकावत्कार्यमिति हेति केन ॥ हरदत्तस्तेमघायुक्तं वर्षासु भवति
त्रयोदशी श्राद्धमिति प्राचरव्यो ॥ ॥ अत्रैवाष्टम्यां महालक्ष्मीव्रतं समाप्तं ॥
तत्र चंद्रोदयव्यापिनी ग्राह्या ॥ तत्कौचंद्रार्घदानविधानाच्चंद्रोदयव्रतत्वे
न चंद्रोदयव्रते चैवेति पिल्लो कालिकीस्मृतेहि वचनात् ॥ अभपत्रे चंद्रोदये स
त्वेऽसत्वे वा कृत्स्नव्याप्तेर्दो ॥ य घूत्तरदिने चंद्रोदयोत्तर त्रिमुहूर्तातदात्तैरेवा
पूर्वा वा परविद्धा वाग्रा त्याचंद्रोदयेतु या ॥ त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्व
गामिनीति ॥ पुराणसमुच्चयवचनात् ॥ अहोरात्रमतिक्रम्य वर्तते यात्तरा तिथि
॥ तदात स्या त्रिपौका यं महालक्ष्मीव्रतं सदेति वचनाच्च ॥ अत्रैव न वम्याम
न्वष्टका श्राद्धं ॥ तत्र कात्यायनः ॥ अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदाहृतं ॥
तत्रादिमातलमध्यं च ततो मातामहांतकं ॥ हेमाद्रौ छागलेयः ॥ केवलाः स्त्रीदे
ये कार्याव हापादौ प्रकीर्तिता ॥ ॥ अन्वष्टकासु मध्यष्टका नांत्याः कार्याः कदाचने

२९

ति॥ दीपिकायां तु॥ मातुः श्राद्धमादौ कार्यमित्यूचे॥ निर्णयामृते पैत्रायणीयगृ
ह्यपरिशिष्टे॥ अन्वष्टक्यं गयाप्राप्तौ सत्यां च मृतेऽहनि॥ मातुः श्राद्धं सुतः कुर्या
त्पितर्यपि च जीवति॥ यद्यपि जीवत्पितृकस्य पंचाप्यन्वष्टकानि त्याज्यानि तथापा
ञारादरात्कस्ये यमावश्यकीति केचित्॥ मातामहचरणास्तु नवम्यां क्षयमा
णमातृश्राद्धं प्रतिपदि क्षियमाणमातामहश्राद्धं च महालयापरपक्षे निमित्त
मेवेति॥ कालतत्त्वविवेचने सोपपत्तिकमुक्तं॥ अत्र त्वन्मातरि जीवंत्यामपि सा
पत्नमातुर्नवम्यां दद्यात्॥ सर्वासामेव मातृणां श्राद्धं कन्यागते रवौ। नवम्यां हि प्रदा
तव्यं ब्रह्मन्स्त्रूमराहिताइति॥ केचिल्लिखितवचने सर्वासामित्युक्तेः॥ अत्र सर्वा
सां नाममन्निर्देशे एकोद्दिष्टः पिंडश्च नामैक्यतु द्विवचनाप्रयोगाइति प्रवृत्तिकाराः
जेते महाणोत्तर मातुः श्राद्धं न कार्यं॥ श्राद्धं नवम्यां कुर्यात्तु मृते भर्तरि लुप्यतइ
तिवचनादिति केचित्॥ अन्ये तु एतद्वचनस्य निर्मूलत्वात्कार्यमित्याहुः॥ मातामह
चरणास्तु पितृकेण पितृश्राद्धदिन एव पृथक्पृथक्वा मातृतः तेऽपि स
पादितत्वान्न कर्तव्यमित्याहुः॥ सर्वं चैतत्कालतत्त्वविवेचने स्पष्टं॥ इदजीव

त्पितृकेणापि सपिंडकं कार्यं॥ हेमाद्रौ विष्णुधर्मोत्तरे॥ अन्वष्टकासु च स्त्रीणां
श्राद्धं कार्यं तथैव चेत्युपक्रम्य॥ पिंडनिर्वपणं कार्यमित्युक्तत्वात्॥ अत्रातिदे
शादेव पिंडदाने प्राप्ते जीवत्पितृकत्वादि प्रयुक्तनिषेधमाति प्रसवार्थं वच
नं॥ अत्र सुवासिनीमरणे न मुक्तं॥ मार्कंडेयपुराणे॥ मातुः श्राद्धं तु संप्राप्ते ब्रा
ह्मणैः सह भोजनं॥ सुवासिन्यै प्रदातव्यमिति॥ शातातपोऽब्रवीत्॥ भर्तु
रग्रे मृता नारी सह दाहेन वा मृता॥ तस्याः स्थाने नियुंजीत विप्रैः सह सुवा
सिनीमिति॥ तत्रैव मदनरत्ने वाक्यं॥ स्त्रीश्राद्धे पुत्र देयास्पुरळं कारश्च यो
षितः॥ मंजीरमेखलादाम कार्णिका कंकणादयः इति॥ अत्रैव त्रयोदश्यां
श्राद्धं महाफलं॥ मघायुक्तो यां तु अतिप्रशस्तं॥ अत्र मत्स्ये मासे पि श्राद्धं का
र्यं॥ अनन्यगकत्वात्॥ मघात्रयोदशी श्राद्धं प्रत्युपस्थितिहेतुकं॥ अन
न्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे इति काठकगृह्योक्तेः॥ इदं च युगा
दिविशेषप्रत्युक्तत्वात्पिंडरहितं कार्यं॥ अयनद्वितये श्राद्धं विषुवद्वितये
तथा॥ युगादिषु च कर्तव्यं पिंडनिर्वपणादृतः॥ इति वचनात्॥ एतच्च पुत्र

न

वृत्तापुत्रांतरोद्देशेनं कार्यं ॥ अविभक्तैरपि पृथक्कार्यं ॥ तथाह माद्रो ॥ विभ
क्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ॥ मघासु चैतत्तोन्यत्र नोधिका
रः पृथग्विनेति ॥ नित्यं चा[illegible] श्राद्धं ॥ ज्येष्ठपद्यामतीतायां तथा कृष्णमात्रयो
दशीत्यूपक्रम्य एतानि श्राद्धकालानि नित्यानाह ॥ प्रजापतिः ॥ श्राद्धमे
तेषु कुर्वाणो नरकं प्रतिपद्यत इति ॥ विष्णुधर्मोत्तरे तु ॥ इयमेव योगविशे
षेण गजच्छाया ॥ तदुक्तं ब्राह्मे ॥ योगो मघात्रयोदश्योः कुंजरच्छायसंज्ञ
कः ॥ मघवन्मघायां सस्थे च शशिन्यर्ककरे स्थिते इति ॥ ॥ अस्मिन्नेव पदे
चेतुर्दश्यां दुर्मरणमृतानां श्राद्धं कार्यं ॥ तथा च मरीचिः ॥ विषसर्पश्वापु
दाद्दितिर्यग्ब्राह्मणघातिनां ॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिते
ति ॥ नागरखंडे ॥ अपमृत्युभवे ह्येषां शस्त्रमृत्युहतेपियुषां ॥ सर्पव्याघ्रहतो
नाः चेश्शृंगैरुद्बंधनैरपि ॥ नथापिको ॥ उपसर्गमृतानां तु विषमृत्युमुपे
युषां ॥ वह्निना विजदग्धानां जलमृत्युमुपेयुषां ॥ सर्पव्याघ्रहतानां च श्रृं

८१

गोरुद्धैधनैरपि॥श्राद्धं तेषु प्रकर्त्तव्यं चतुर्दश्यां जराधिपति॥मार्कंडेयपुरा
णे॥युवानः पितरो यस्य मृताः शस्त्रेण वा हताः॥तेन कार्यं चतुर्दश्यां तेषां
तृप्तिमभीप्सितेति॥प्रायोनशनाम्पातु विधितोपि मृतानां भवति॥प्रा
योनशनशस्त्राग्निविषाद्बंधनिर्नां तथा॥चतुर्दश्यां भवेछ्राद्धमिति॥
ब्रह्मपुराणे॥युद्धमृतानां च॥प्रीयंते पितरश्चास्य ये च शस्त्रहता रणे इति
हृद्धमनुस्मरणोत॥एतेषां शस्त्रघातादिनिमित्तं चतुर्दशी श्राद्धं पित्र्यादि
नामप्येकोद्दिष्टमेव भवति॥न तु पार्वणं॥तथा च गार्ग्यः॥चतुर्दश्यां तु य
च्छ्राद्धं सपिंडीकरणात्परं॥एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनेति॥
पित्रादिषु त्रिषु पि शस्त्रहतेषु सर्वेषामेकोद्दिष्टान्येव कार्याणि॥पार्वणं
विधायकवचनानां वाह॥पुत्र पित्रादयस्त्रयोप्यस्य शस्त्रघातादि नि
हताः॥सम्मते पार्वणं कुर्याद्दाहिकानि पृथक् पृथगिति वचनेन तत्रामा

णिकं ग्रंथेषु दर्शनादनाकरणं॥ इदं चैकोद्दिष्टं सदैवं कार्यं॥ प्रेतपक्षे चतुर्दश्या-
मेकोद्दिष्टविधानतः॥ दैवयुक्तं तु तच्छ्राद्धं पित्र्यमद्यं भवेदिति॥ प्रयोगपारिजा-
तोदाहृतवचनात्॥ यस्त्वेतस्यामेव चतुर्दश्यां मृतस्तस्य क्षयाह निमित्ते श्राद्धं
पार्वणविधिनैव कर्त्तव्यं॥ अमावास्या क्षयो यस्य प्रेतपक्षेऽथवा पुनः॥ पार्व-
णं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचनेति॥ नेश्वरधृतवचनात्॥ अमावास्यायां वि-
शेषमाह॥ अपरार्के यमः॥ हंसे करस्थिते यातु अमावास्या करान्विता॥ सा ज्ञेया
कुंजरच्छाया इति बौधायनोब्रवीत्॥ ॥ इति गजच्छाया॥ ॥ आश्विने शुक्लप्रति-
पदि जीवत्पितृकेन दौहित्रेण मातामहश्राद्धं कार्यं॥ तदुक्तं हेमाद्रौ॥ जातमा-
त्रोपि दौहित्रो जीवत्यपि च मातुले॥ कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते॥ इ-
ति॥ इयं च संगवव्यापिनी ग्राह्येति॥ निर्णयदीपकेतु॥ प्रतिपद्याश्विने शुक्ले दौहि-
त्रस्त्वेकपार्वणं॥ श्राद्धं मातामहं कुर्यात्सपिता संगवे सितेति॥ सपितेति विशे-
षणात् जीवत्पितृकस्यैवाधिकारः॥ इदं च मुंडनं पिंडदानं चेति दक्षवचनेन जी-

जीवत्पितृकं प्रतिपिंडदाननिषेधादष्टकाद्वे विशेषवचनाभावात्पिंडरहितं कार्य
मिति केचित्॥ अन्ये तु न जीवत्पितृकं प्रतिपिंडदानमात्रमनेन निषिध्यते॥ किंतु॥
दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च
तर्पणमिति वचनेन निकृष्टकाम्यतया श्राद्धमेव निषिध्यते तद्वाक्यगतदर्शादिमुप
लक्षणं॥ एवं च तस्य विशेषप्राप्तश्राद्धं सपिंडमेव भवतीत्याहुः॥ अस्यामेव नव
रात्रारंभः॥ तत्र व्रतस्वरूपं भविष्योत्तरे॥ एवं च विंध्यवासिन्या नवरात्रोपवासतः॥
एकभक्तेन नक्तेन तथैवायाचितेन वा॥ पूजनीया जनैर्देवी स्थाने स्थाने पुरे पु
रे॥ गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रि
यैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः॥ स्त्रीभिश्च कुरुशार्दूल
तद्विधानेदं शृण्विति॥ देवीपुराणे॥ कन्यासंस्थे रवौ शुक्लामारभ्य नंदि
कां॥ अयाचित्यथवैकाशी नक्ताशी वाथवा यवः॥ प्रातःस्नायी तथा मर्त्यः कुमारी
भोजनैर्मुदा॥ वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरं॥ बलिं च प्रत्यहं दद्यादो
दनं मांसमाषवत्॥ त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणेति॥ अत्र देवीपूजो

प्रधानं उपवासादिकमंगं ॥ पूजयित्वाश्विने मासि विशोको जायते नर इत्यादौ श्रूयमा
णाया एव फलसंबंधादिति ॥ अत्र प्रतिपदः खंडत्वे केचिन्नावत्यारविहायोत्तरा ग्राह्येत्याहुः ॥
तथा चोक्तं मार्कंडेयदेवीपुराणयोः ॥ पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विने ॥
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ॥ देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते ॥
नंदायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति ॥ तथा ॥ अमायुक्ता न कर्तव्या प्र
तिपत्पूजने मम ॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥ तथा ॥ न दर्शकल
यायुक्ता प्रतिपच्चंडिकार्चने ॥ उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनी ॥ शुद्धाधि
का तु पूर्वविद्धा त्याज्या ॥ संपूर्णत्वाद्दमायोगाभावाच्च ॥ यदा चामाविद्धा प्रतिपत्परेद्युर्न
नास्ति ॥ तदा विद्धापि ग्राह्या ॥ एतद्विषयाण्येव अमायुक्ता प्रकर्तव्येति नृसिंहप्र
सादोदाहृतवचनानीति ॥ मातामहचरणास्तु ॥ माधवहेमाद्र्याद्युक्तेन नक्तव्रतत्वो
क्त्या रोधेन खंडप्रतिपत्प्रदोषव्यापिनी ग्राह्येत्युक्तं ॥ नक्तव्रतत्वं चेन्न नक्तभोजन
रूपत्वाभावात् ॥ तस्य पाक्षिकत्वाद्गत्वाच्च ॥ किंतु पूजारूपस्य प्रधानस्य नक्तकाल
माध्यत्वाभावात् ॥ तच्च ॥ निशि अत्र मंतिभूतानि नक्तयपः श्रेष्ठमध्येत्यादिसामान्य

३३

वचनात्॥ आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत्॥ तस्यां नक्तं प्रकुर्वीत रात्रौ
देवीं प्रपूजयेत्॥ रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम्॥ रात्रिव्रतमिदं तस्य रात्रौ के
लव्यतेष्यते त्यादि॥ देवीपुराणादिवचनेभ्यश्चावगम्यते॥ एवं च पूजारूपस्य
प्रधानस्य रात्रिकालव्यवस्थिते कर्मणो यस्य यः काल इति वचनात्प्रदोषव्यापिनी प्र
तिपद्ग्राह्या॥ तत्र पूर्वदिन एव प्रदोषव्याप्तौ पूर्वा॥ दिनद्वये तद्व्याप्तावुत्त
रा॥ दिनद्वये तद्व्याप्त्यभावे पूर्वैव॥ सायाह्नरूपगौणकालव्याप्तिसद्भावात्॥ यत्तु॥
आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा॥ अपराह्णे च कर्तव्यं शुद्धे सति ति
कौदिशमिरिति वचनं तद् घोषोडश नाडिमितस्तल्लभ्याय कुरुते नरः॥ कलश
स्थापनं तेन शीघ्रं जायते ध्रुवमिति वचनात् तदेकवाक्यतापाकुलाचारात्प्रक
लशस्थापनविषयं॥ एवं द्वितीयाविद्धप्रतिपद्विधायकानि॥ अमायुक्तनिषेध
कानि वचनानि कलशस्थापनविषयाण्येव॥ अमायुक्ता सदा चैव प्रतिपन्निन्दि
ता तथा॥ तत्र चेत्स्थापयेत्कुंभं दुर्भिक्षं जायते ध्रुवं॥ प्रतिपत्सहिते पाते कुंभारोप
णकर्मणीति॥ रुद्रयामलवचनात्॥ यदपि॥ शरीरम्पं नवरात्रं स्यात् हीनाचित्राच

वैधृतिमिति॥ वचनेतदपि त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चने॥ तयो
रंते विधातव्यं कलशारोपणं गृहे इति वचनात् कलशस्थापनमेव॥ अत्र विशे
षमाह दुर्गोत्सवे॥ कात्यायन:॥ प्रतिपद्याश्विने मासि भवे वैधृतिचित्रयो:
॥ आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकं॥ भविष्ये॥ चित्रावैधृतिसंयुक्ता
प्रतिपच्चेद्भवेन्नृप॥ त्याज्यास्त्र्यंशास्तु युक्त्वाद्यास्तुरीयांशे तु पूजनमिति॥
तथा॥ नराजौ स्थापनं कार्यं न चैकुंभाभिषेचनं॥ विष्णुधर्मे॥ भास्करोदयमा
रभ्य यावत्तु दशनाडिका:॥ प्रात:काल इति प्रोक्त: स्थापनारोपणादिषु इति
॥ तद्यामले॥ स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत्॥ शुभाभिर्मृत्ति
काभिश्च पूर्वं कृत्वा तु वेदिकां॥ यवान्वापयेत्तत्र गोधूमैश्चापि संयुतान्॥
तत्र संस्थापयेत्कुंभं विधिना मंत्रपूर्वकं॥ सौवर्णं राजतं वापि ताम्रं मृन्मयमे
व चेति॥ देवीपूजा च जयंतीमंत्रेण कार्या॥ जयंती मंगला काली भद्रकाली क
पालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते॥ अनेनैव तु मंत्रे
ण जपहोमादिकं चरेदिति॥ देवीपुराणे॥ दुर्गालिंगकोवेदिकं भोगमि

को वा॥ तल्लिंगैः पूजयेन्मंत्रैः सर्वदेवाः समाहिता इति॥ अग्निपुराणात्॥ ग्रहणादि
चतुर्थ्यंतेन मोंतेनोमवापुनः॥ नाम्नासर्वं समापयेदिति साधारणवाक्यात्॥
पूजा च षोडशोपचारैः पंचोपचारैर्वा अन्यैश्च राजोपचारैः छत्रचामरादिभिः
॥ सा च त्रिकालं मप्रदोषविशेषेण॥ पूजानंतरं च मार्कंडेयपुराणादिगते
देवीमहात्म्यपठेच्छृणुयाद्वा॥ माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितं॥
पठेच्च शृणुयाद्वापि सर्वकामसमृद्धये इति वचनात्॥ तथा॥ एकोत्तराभिवृद्ध्या
तु नवमीं यावद्देवि हि॥ चंडीपाठं जपेत्पश्चाप्पिजापते द्वा विधानत इति॥ अत्र पाठश्च
ब्राह्मणादेव कर्तव्यः॥ वाचकं ब्राह्मणं विद्यान्नान्यवर्णजमादरादिति॥ भवि
ष्यपुराणात्॥ पौराणस्तोत्रपाठश्च नारायणादीन्नमस्कृत्य कर्तव्यः॥ नारा
यणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेदिति
वचनात्॥ जयशब्दार्थश्च भविष्ये॥ अष्टादशपुराणानि रामस्य चरितं तथा॥
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत॥ कार्ष्णं च पंचमो वेदो यन्महा
भारतं स्मृतं॥ शैवाश्च धर्मा राजेंद्र मानवोक्ता महीपते॥ जयेति नाम एतेषां

वदंतिमनीषिण इति पाठप्रकारश्च ॥ मत्स्यसूक्ते ॥ प्रणवं चादौ दत्त्वा स्तोत्रं वा संहितां
पठेत् ॥ अंते च प्रणवं दद्यादित्येवं वाचादिमनीषः ॥ सर्वत्र पादे विज्ञेयो ह्यन्यथा वि-
फलं भवेत् ॥ गुरुहीनानन्यचित्तेन पठितव्यं प्रयत्नतः ॥ न कार्यो सत्क्रमेणैसा कार्यः स्तो-
त्रस्य वाचने ॥ आधारस्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ॥ हस्तसंस्थापनादे-
व यस्मादल्पफलं भवेत् ॥ स्वयं च लिखितं यत्तु कृतिनालिखितं च यत् ॥ अब्रा-
ह्मणेन लिखितं तच्चापि विफलं भवेत् ॥ ऋषिछंदादिकं न्यस्य पठेत्स्तोत्रं वि-
चक्षणः ॥ स्तोत्रेण दृश्यते यत्र प्रणवान्यासमाचरेत् ॥ संकल्पितस्तोत्रपाठे स-
र्वो हि त्वा पठेत्सुधीः ॥ अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥ कृते विरामे
मध्ये तु अध्यायादि पठेत्पुनः ॥ इति ॥ दुर्गामंत्रे वैदिके मार्गामिके वा जपेल्लोपये-
द्वा ॥ दुर्गामंत्रतो जपेन्मंत्रं मैकचित्तः समाहिते इति ॥ देवीपुराणात् ॥ कुमारीभोजनं
च प्रत्यहं यथाशक्ति एकद्व्यादिक्रमेण कार्यं तत्प्रकारश्च ॥ देवीपुराणे ॥ ब्लो-
का च ॥ न तथा तुष्यते शक्रो होमदानजपेन तु ॥ कुमारीभोजनेनात्र यथा देवी
प्रसीदति ॥ अत्र नवरात्रे ॥ पदोल्पपादो सर्वासां कुमारीणां च वा सवा ॥ सुलि

35

हेमंतले स्थे तत्र ता आसने स्थिता ॥ पूजयेद्गंधपुष्पैश्च तत्तन्मिश्राप्तिमनोरमैः
॥ पूजयित्वा विधानेन भोजनं तासु दापयेत् ॥ खंडलड्डुगुडसर्पिर्दधिक्षीरस
मान्विकं ॥ तासां देयं कुमारीणां शनैर्भुंजीपयेत्तु तां ॥ पानीयं पाचितं देय
मन्नं वा याचितं शुभं ॥ तांबूलं तास्तु पदा सर्वास्तदोत्वा चमनं ददेत ॥ आचम्य
चाक्षतान् दत्वा त्वया दत्तं तव्या मित्यूत ॥ दातुः शिरसि दातव्याः कन्यकाभिरथा
क्षता ॥ तेनापि प्रणिपातस्तु कर्तव्यो भक्तिपूर्वकः ॥ अनेन विधिना शक्रदेवी
दिप्रे प्रसीदति ॥ ददाति विविधान्कामान्मनोभीष्टान्सुराधिप ॥ राज्यं कृत्वा त
तः पश्चाद्देवलोके च गच्छतीति ॥ स्कांदे ॥ एकैकां पूजयेत्कन्यामेकवृद्ध्या तथै
व च ॥ द्विगुणां त्रिगुणां वापि प्रत्येकं नवकैव वा ॥ नवमिर्लभते भूमिमैश्वर्यं द्वि
गुणेन तु ॥ एकवृद्ध्या लभेल्लक्ष्मीं क्रमेणैकेन च श्रियं लभेत ॥ एकवर्षा तु या कन्या
पूजार्थं तां विवर्जयेत् ॥ गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥ द्विवर्षा
कन्यामारभ्य दशवर्षावधि क्रमात् ॥ सा च ता क्रमेण कुमारिका ॥ त्रिमूर्तिः ॥ ३५
कल्याणी ॥ रोहिणी ॥ काली ॥ चंडिका ॥ शांभवी ॥ दुर्गा ॥ सुभद्रेति नामान्युक्तानि

स्कांदे॥ कुमारिका द्विवर्षा तु त्रिवर्षा तु त्रिमूर्तिनी॥ चतुर्वर्षा तु कल्याणी पंचवर्षा तु
रोहिणी॥ षड्वर्षा तु भवेत्काली सप्तवर्षा तु चंडिका॥ अष्टवर्षा शांभवी तु दुर्गा तु
नववार्षिकी स्मृता॥ दशवर्षा सुभद्रेति नामभिः परिकीर्तिता॥ अत ऊर्ध्वं तु या कन्या
सर्वकार्येषु वर्जिता॥ आसां क्रमेण फलान्याह सएवं॥ दुःखदारिद्र्यनाशाय श-
त्रूणां नाशनाय च॥ आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः॥ आयुःकामस्त्रिमू-
र्तिं तु त्रिवर्गस्य च फलाप्तये॥ अपमृत्युव्याधिपीडा च दुःखानामनुपतये॥ सौख्य
धान्यधनारोग्यपुत्रपौत्राभिवृद्धये॥ कल्याणीं पूजयेद्धीमान्नित्यं कल्याणवृद्धये॥
आरोग्यसुखकामी च धनकामी तथैव च॥ यशस्कामी नरो नित्यं रोहिणीं परिपू-
जयेत्॥ व्याधिघ्ना परचक्रपाधश्च राज्यापहे च विशेषतः॥ शत्रूणां च विनाशार्थं कालि-
कां पूजयेन्नरः॥ संग्रामे जयकामी च चंडिकां परिपूजयेत्॥ दुःखदारिद्र्यनाशाय
नृपसंमोहनाय च॥ महापापविनाशाय शांभवीं च प्रपूजयेत्॥ सबलोत्कटशत्रू-
णां मुग्रसाधनकर्मणि॥ दुर्गां दारिद्र्यनाशाय पूजयेद्धीमतो बुधः॥ सौभाग्यध-
नधान्यादिवांछितार्थफलाप्तये॥ सुभद्रां पूजयेन्मर्त्यो दासीदासविवृद्धये॥ पू

38

नाप्रकारश्चैतेत्रेवर्गः प्रातःकाले विशेषेण कृताभ्यंगो विशेषतः ॥ आवाहयेत्ततः क-
न्यां मंत्रेणानेन मार्गवित् ॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ॥ नवदुर्गात्मि-
कां साक्षात्कन्यामावाहयाम्यहं ॥ आवाहनमंत्रः ॥ ततः संपूजयेद्धीमान्मंत्रैरेभिः
पृथक्पृथक् ॥ नाममंत्रैः ॥ जगत्पूज्ये सर्ववंद्ये सर्वशक्तिस्वरूपिणी ॥ पूजां गृहा-
ण कौमारि जगन्मातर्नमोस्तुते ॥ त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीं ॥ त्रैलो-
क्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं ॥ कल्याण्याः ॥ अणिमादिगुणाधाराम-
काराद्यक्षरात्मिकां ॥ अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं ॥ रोहिण्याः ॥
कामचारीं शुभां कांतां कालचक्रस्वरूपिणीं ॥ कामदां करुणोदारां कालिकां सं-
पूजयाम्यहं ॥ काल्याः ॥ चंडवीरां चंडमायां चंडमुंडप्रभंजिनीं ॥ पूजयामि सदा
देवीं चंडिकां चंडविक्रमां ॥ चंडिकायाः ॥ सदानंदकरीं शांतां सर्वदेवनमस्कृतां ॥
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं ॥ शांभव्याः ॥ दुर्गमे दुस्तरे कार्ये भव-
दुःखविनाशिनीं ॥ पूजयामि सदा दुर्गां दुर्गां दुर्गतिनाशिनीं ॥ दुर्गायाः ॥ सुंदरीं स्वर्णव-
र्णाभां सुखसौभाग्यदायिनीं ॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं ॥ सुभद्रायाः ॥ ३६
एवमभ्यर्चनं कुर्यात्कुमारीणां प्रयत्नतः ॥ कंचुकैश्चैव वस्त्रैः स्रग्गंधपुष्पाक्षतैः

दिक्षिः॥ नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः॥ हीनाधिकांगीं कुष्ठादिवि
कारां कुकुलां तथा॥ ग्रंथिस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां॥ जात्यंधां केकरीं
काणां कुरूपां ततुरोमशां॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां॥ अरो
गिणीं सुपुष्टांगीं सुरूपां व्रणवर्जितां॥ एकवंशसमुद्भूतां कन्यां सम्यक्प्रपूजये
त॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां॥ लाभार्थे वैश्यवंशोत्थां सुता
र्थे शूद्रवंशजां॥ दारुणे चांत्यजातीनां पूजयेद्विधिना नरः॥ इति॥ केचित्तु सर्वासा
मेकैव मंत्रेण॥ मंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीं॥ नवदुर्गात्मि
कां साक्षात्कन्यामावाहयाम्यहं॥ अत्र वेदपारायणमुक्तं॥ रुद्रयामले॥ एवं पू
तु वेदविदो विप्रान्सर्वान्प्रसादयेत्॥ तेषां च वरणं कार्यं वेदपारायणाय वै॥ इति॥
तथा देवीपुराणे॥ यदा घोदिवसे कुर्याच्चंडिकापूजनादिकं॥ द्विगुणं तद्द्वितीये त्रि
त्रिगुणं तत्परे हनि॥ नवमीतिथिपर्यंतं वृद्ध्या पूजाजपादिकं॥ अशक्तौ पूजादि
कमन्येन करणीयं॥ स्वयं वाप्यन्यतो वापि पूजयेत्पूजयेत् पीत चेति॥ देवीपुराणा
त्॥ इदं चेष्टं कौसल्यादावपि कार्यं॥ न चेष्टं कैतत्पाजीवे सिंहस्थे च हस्ते॥ का

यचैव त्वद्देवार्चा प्रत्यहं कुलधर्मतेति ॥ धर्मप्रदीपे ॥ अत्र साश्वस्य अस्य पूजन
मुक्तं मदनरत्ने दानहेमाद्रौ देवीपुराणे ॥ अश्वयुक्कृष्णपक्षे प्रतिपत्त्युदितयुक्ते तु शोभ
ने ॥ पूर्वमुक्तः श्रवणनाम प्रथमं सूर्यमावहेत ॥ तस्मात्ताश्विने रैत्तचे पूज्या से
श्रद्धयान्विते ॥ पूजनीयाश्चतुरंगा नवमीयावदेवेहि ॥ शान्तिस्वस्त्ययनं कार्यं
तदीतेषां दिने दिने ॥ धान्यमक्षतकं कुष्ठं वचा सिद्धार्थकांस्तथा ॥ पंचरंगेण सूत्रे
ण कंठे तेषां तु बंधयेत ॥ वायव्ये वीरुणो ःसौरैः शाक्रैर्मंत्रैः सपल्लवैः ॥ वैश्वदेवै
स्तथाग्नेये होमः कार्यो दिने दिने ॥ तुरगा रक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः ॥
दारिद्र्यतः क्वचित्तत्र न चेन्नात्याः कथंचनेति ॥ तु ॥ ज्येष्ठायोगे पुरा तत्र गजो
श्याष्टौ महावक्राः ॥ पृथिवीमवहन्पूर्वं सर्वा लवणकाननं ॥ कुमुदैरावणः पद्मः
पुष्पदंतोथ वामनः ॥ सुप्रतीकोंजनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥ शाकाद्वौ
लस्मारभ्य नवम्यंते च पूर्ववदिति ॥ प्रतिपदादि पूजाप्रकारविशेषो भविष्ये ॥ के
शसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने ॥ पट्टदोरं द्वितीयायां केशसंयमहेतवे ॥
दर्पणं च तृतीयायां सिंदूरालक्तकं तथा ॥ मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडने ॥ ३७
पंचम्यामंगरागं च शक्त्यालंकरणानि च ॥ षष्ठ्यां विल्वतरौ बोधं सायं संध्यासु

श्र

यैदिति॥ रुद्रयामले॥ मूले क्षेसुराधीशा पूजनीया सरस्वती॥ पूजयेत्प्रत्यहं दे
वं यावद्दशमं ऋक्षकं॥ नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन॥ पुस्तके र
स्थापिते देवि विद्याकामो द्विजोत्तम॥ षष्ठ्यादि पञ्चपुक्ते कालिकापुराणे॥ बो
धयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रति
पूजयेत्॥ पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्॥ जागरं च स्वयं कुर्याद्बलिदा
नं महानिशि॥ प्रभूतबलिदानं च नवम्यां विधिवच्चरेत्॥ ध्यायेद्दशभुजां देवीं दु
र्गामन्त्रेण पूजयेत्॥ विसर्जनं दशम्यां तु कुर्याद्वै शावरोत्सवैः॥ धूलीकर्दमनि
क्षेपैः क्रीडाकौतुकमङ्गलैः॥ भगलिङ्गाभिधानैश्च भगगीतकैरिति॥ देवीपुरा
णे॥ ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणं॥ सप्तम्यां मूलयुक्तायां पत्रिका
याः प्रवेशनं॥ पूर्वाषाढयुताष्टम्यां पूजाहोमाद्युपोषणं॥ उत्तरेण नवम्यां तु बलि
भिः पूजयेच्छिवां॥ श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति॥ अत्र तत्तत्तिथीनां
तत्तन्नक्षत्रयोगः॥ संभवे फलातिशयार्थः न तु सर्वादरणीयः॥ तदुक्तं लैङ्गे॥
मूलाभावेपि सप्तम्यां केवलायां प्रवेशयेत्॥ तथा तिथ्यन्तरेष्वेवमृक्षदोषफलोच्चयः॥
देवले॥ तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं॥ योगाभावे तिथिर्ग्राह्या देव्याः

पूजनं कर्मणीति ॥ तत्र नम्यादिपद्मोभविष्ये ॥ व्रतीप्रपूजयेद्देवीं सप्तम्यादि नवत्रयइ
ति ॥ भविष्योत्तरे पि ॥ त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति ॥ अष्टमीनव
म्योरेव वा पूजनं कर्तव्यं ॥ अष्टम्यां च नवम्यां च जगन्मातेदंप्रदोशिवां ॥ पूजयित्वा
श्विने मासि विशोको जायते नर इति भवचनात् ॥ केवलाष्टमीपूजाका ब्राह्मे ॥ तत्रा
ष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ॥ प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैः ॥ उपोषितैर्धूपदीपवस्त्रैर्माल्यानुलेप
नैरिति ॥ अयं केवलाष्टम्युपवासः पुत्रवतो निषिद्धः ॥ उपवासं महाष्टम्यां पुत्रवान्न
समाचरेत् ॥ तथातत्पे वपूताव्रती देवीं विसर्जयेदिति ॥ कालिकापुराणात् ॥ केव
लनवमीपूजा भविष्ये ॥ केशाभिषेकावरदा शुक्ले चाश्वयुजस्य च ॥ तस्मात्तात्र
सप्तम्यां नवम्यां चण्डिका बुधैरिति ॥ उपवासोप्यस्यामुक्तः ॥ तस्मादियं महापुण्या
नवमी पापनाशिनी ॥ उपोष्यानुश्यपल्ने न सततं सर्वपार्थिवैरिति ॥ पत्रिकापूजा या
आश्विने कृष्णनवम्यां बोधनासामर्थ्ये नवरात्रे तु गते षष्ठ्यां बिल्वतरोबोधं साय
संध्यासु कारयेदिति भविष्यवचनात् ॥ अतएव षष्ठी सायंसंध्याव्यापिनी ग्राह्या ॥
आमंत्रणं तु पत्रीप्रवेशाव्यवहितपूर्वदिने कार्यं ॥ तदुक्तं ब्रह्माण्डपुराणे ॥ पत्रीप्रवे

शाल्मर्वृक्षः स पाद्के विन्ध्यवासिनं गचंडीनाम तत्र योद्धा नत्त्रे शेषपुरस्क्रियेति ॥ मात्स्ये
सप्तके ॥ ज्येष्ठायामथवा षष्ठीसायंकालेन चेद्भवेत् ॥ सायमेतत्तथापि स्यादित्युक्त्वा शा
खाभिमंत्रणं ॥ पूर्वा षष्ठी सनक्षत्रा सायंप्राप्तामपि त्यजेत् ॥ यदा तु पत्रिकापूजा
नपोऽत्रे मूले विष्णते ॥ सन्निकृष्टतु यत्पूर्वं पत्रिकादिवसे स्यते ॥ तद्दिने वरणं कार्यापि
रे शाखां त्रवेशयेदिति ॥ पत्रिकापूजायां सप्तम्यादितिथित्रयं प्रातःकालीनमुत
रोत्तरत्तिथिविहितमेव याल्यं ॥ भगवत्याः प्रवेशादिविसर्गांतां स्युयाः क्रियाः ॥ तिथाउ
दयगामिन्यां सर्वास्ताः कारयेद्बुध इति ॥ नंदिकेश्वरपुराणात् ॥ अष्टमीतु पत्रीपू
जातिगं क्षोपि देवीपूजने नवमीविद्धैव ग्राह्या ॥ वसुरंध्रयोरिति युग्मवाक्यात् ॥
शरन्महाष्टमी पूज्या नवमीसंयुता सदा ॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी
॥ सप्तमीशल्यसंयुक्ता मोहादज्ञानतोपि वा ॥ महाष्टमीं प्रकुर्वाणो नरकं प्रति
पद्यते इति ॥ मदनरत्ने धृतं तन्मते संग्रहात्च ॥ ॥ स्मृतिसमुच्चये ॥ सप्तमीसंशल्य
विद्धा वर्जनीया सदाष्टमी ॥ स्तोकापि सा तिथिः पुण्या यस्यां सूर्योदयो भवेत् ॥ दुर्गो
त्सवे ॥ कलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः ॥ लेशमात्रेण सप्तम्यामपि स्या
द्यदि दूषिता ॥ अतएव गौरीव्रतयादेव अष्टमी सप्तमीयोगेन त्याज्यत्व ॥ अल्पा

३९

याउरस्याअष्टम्यायात्वंदृष्टव्यं॥ यदातुपरदिनेनवमीसूर्योदयेनस्पृशतितदाष्ट
मीसप्तमीविद्धैवग्राह्या॥ यदासूर्योदयेनस्यान्नवमीचापरेहनि॥ तदाष्टमीद्विकु
र्वीतसप्तम्यासहितांनृपस्तिा॥ स्मृतिसंग्रहात्॥ तथाचअहेमद्वावमद्वाचनाचयोरत
रेक्वचित्॥ तस्माद्वैसप्तमीविद्धाकार्यादुर्गाष्टमीतिथिरित्यादीनिवचनानिएतद्वि
षयाण्येव॥ इयंचसौमेतिप्रशस्ता॥ अष्टम्यामुदितेसूर्येदिनातेनवमीसवेत्॥ कुज
वारोभवेत्तत्रपूजनीयाप्रयत्नेतेति॥ मदनरत्नधृतेवचनात्॥ अत्रविशेषणपूजोक्ता
र्या॥ पुनःपूजांतेपाष्टम्यांविशेषेणसमाचरेत्॥ जागरंचस्वयंकुर्याद्बलिदानंमहा
निशीति॥ कालिकापुराणात्॥ तथा पशुघातःप्रकर्तव्योबलादजवेघःस्तथा॥
तथा देवीतुपूजयित्वापेअर्द्धरात्रेष्टमीषु च॥ घातयंतिपशून्भक्त्या ते भवंति म
हाबलाः॥ बलिंचयेप्रयच्छंति सर्वभूतविनाशने॥ तेषांतुतुष्यतेदेवीयावत्कल्प
तुशंकरमिति॥ इयंचबलिदानेअग्निषोमीयपशुहिंसान्यायेनधर्ममपिक्षत्रिया
दिपरमेव॥ ब्राह्मणस्यतु॥ सात्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैरितीपमेव
पूजाभवति॥ नसात्विकेकर्मस्वेवाधिकारस्यभगवद्गीतादिषुप्रसिद्धत्वात्॥
स्पष्टमेतदुक्तंदेवीपुराणे॥ तदर्द्धयामिनीशौंडविजयार्थंनृपोत्तमाः॥ पंचाङ्गलक्ष

णोपेतं गंधधूपस्रगर्चितं ॥ विधिवत्काळिकाल्यैतिजस्त्वा खड्गेन घातयेदिति ॥ एवं
सुरयास्वगात्ररुधिरेण च पूजा ब्राह्मणस्य न भवति ॥ स्वगात्ररुधिरं दत्वा ब्रह्महत्या
मवाप्नुयात् ॥ मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥ इति ॥ कालिकापुराणात् ॥
माषजकादिनां तु बलिदानं ब्राह्मणस्य भवति ॥ माषकुल्माषमांसाद्यैर्दद्यादिदं
बलिं निषिद्धां कूष्माण्डमिक्षुदंडं च मद्यमांसवदेव तु ॥ एते बलिसमा ज्ञेयास्तृप्तौ छा
गसमाः स्मृता इति कालिकापुराणात् ॥ रुद्रयामले ॥ छागाभावे तु कूष्माण्डं श्रीफलं त्व
वा मनोहरं ॥ वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना इति ॥ होमस्तु पूर्वोषाढायुताष्ट
म्यां पूजा होमाद्युपोषणमिष्टम्यां ॥ नवम्यां बलिदानं च कर्त्तव्यं वै यथाविधि ॥
जपहोमं च विधिवत्कुर्यात्तत्र विभूतये इति ॥ नवम्यां चाविधानात् ॥ शिष्टसमाचारा
च्च ॥ अष्टम्यामारभ्य नवम्यां समापनीयो नवम्यामेव वा कार्यः ॥ होमद्रव्याण्याति
ळादि ॥ पूजयेत्तिळहोमैश्च दधिक्षीरघृतान्वितैः इति देवीपुराणात् ॥ मंत्रश्च जयंती
त्यादि ॥ अनेनैव तु मंत्रेण जपहोमादि कारयेदिति देवीपुराणात् ॥ केचित्तु मार्कंडेय
पुराणगतसप्तशतीस्तवेन प्रतिश्लोकं स्वाहाकारांतेन तिळसर्षपपायसेन हो ४०
मं कुर्वंति ॥ प्रतिश्लोकं जुहुयात्पायसं तिळसर्पिषा तिरहस्यात्वाययंथवचनेन तत्र प्र

माणमुपन्यस्यंति॥ रुद्रयामलेपि॥ प्रधानद्रव्यमुद्दिष्टं पायसान्नेति कासतथा॥ किं
शुकैः सर्षपैः पूगैः क्षाजैर्दुर्वांकुरैस्तथा॥ पवित्रैः श्रीफलैर्दिव्यैर्नानाविधिफलैस्त
था॥ रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः॥ प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि चै
कमात्॥ इति महाष्टमी॥ ॥ अथ नवमी॥ ॥ सा चेअष्टमी विद्धा ग्राह्या॥ युग्मवाक्या
त्॥ श्रीवर्णि दुर्गे नवमी तथा द्वर्वाष्टमी जया॥ पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दि
नमिति॥ वहदुमवचनाच्च॥ तथा॥ अश्वयुक् शुक्लपक्षे याष्टमी मूलेन संयुता॥
सा महानवमी प्रोक्ता॥ अस्यां पूजादि कृत्वा परेऽह्नि तु बलिदानं कार्यं। परेह्नि बलि
दानं चेन्नवम्यां विधिर्वक्ष्ये दिति कालिकापुराणात्॥ यदा तु नवमी अष्टमीविद्धा
लब्धा द्वितीयदिनेपि किंचित् तदा नवमीमता नवमीयुक्तस्य पूजादेः पूर्वदिने तु ष्ठा
नेपि महाबलिदानमात्रं द्वितीयदिने कर्तव्यं॥ अष्टम्यामुदिते सूर्ये दिनांते नवमी भ
वेत्॥ प्रभाते बलिदानेपि किंयन्मात्रापि लभ्यते॥ नवम्यां तत्र संपूज्या दुर्गा दुर्ग
र्तिनाशनीति वचनात्॥ अत्र पूजाबलिदाने रूपे वास्य यो दयपूर्वोरिः क्तो पूर्णास्या
द्परापद्दिने बलिदानं मकर्तव्यं तत्र देव्याः शुभावहा॥ बलिदाने कृते ष्टम्यां राष्ट्रभ
गो भवेन्नृपेतिः देवीपुराणात्॥ इदं च बलिदानं नवमीयुक्तो अष्टमीत्र युक्ते स्यो

नैव कर्तव्यस्त्वादा॥ द्वितीयदिने नवम्यां अलाभे पूर्वेद्युरेव नवमीध्ये कार्यं॥ दशम्यां बलिदानं तु दीयते प्रमाणवे ॥ तद्रोषनाशमायाति मरकोपद्रवैः स्फुटमिति ॥ भविष्ये ॥ नवमीश्रयुक्तस्य बलिदानस्य दशम्यां करणे दोषश्रवणात् ॥ एवं नवम्यां होमकुमारीपूजनब्राह्मणभोजनादिकं त्वा दक्षिणमाचार्याय दद्यात् ॥ नवम्यां पूर्वेद्युः पूजा केतव्या मतिमिच्छता ॥ दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदितं ॥ मत्स्यसूक्ते ॥ विसर्जनं तु दशम्यामेव कार्यं ॥ स प्रत्यूषे श्रवणं कुर्यात् दशम्यां शावरोत्सवैरिति ॥ विष्णुपुराणे ॥ ततः सं प्रेषिता देवी दशम्यां शावरोत्सवैरिति ॥ कालिकापुराणे ॥ पारणस्यापि नियमत्यागरूपस्य विसर्जनोत्तरकालत्वात् तदपि विसर्जनोत्तरं दशम्यामेव कर्तव्यं ॥ अत एव हेमाद्रौ धौम्यवचने नवमीपर्यन्तं व्रतमुक्तं ॥ आश्विने शुक्लपक्षे तु कर्तव्यं नवरात्रकं ॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेदिति ॥ नवरात्रिपर्यन्तं पूजाजपादिकमिति च ॥ एवं चोविंद्यवासिन्यां नवरात्रोपवासत इति ॥ भविष्योत्तरे ॥ यदुक्तं आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः ॥ नवम्यां पारणं कुर्याद्दशम्यामिति मिश्रितां न चेदिति ॥ ब्राह्मणेनाम्नाकेनाचिल्लिखितं वचनं तदनाकरं ॥ साकरं चेल्लोहाभिसारिकविषयं तत्स्याष्टमीपर्यन्तत्वोक्तेः ॥ अत्र स्मृतकादौ पारणा कार्येत्यु

क्तं रुद्रयामले ॥ सूर्षेतु केपारणं कुर्यान्नवम्यां होमपूर्वकं ॥ तद्दिने भोजयेद्विप्रान्नदा
नं दद्याच्च शक्तितेति ॥ अगिरास्त्वेनकार्यमित्युक्तं ॥ नियमस्थाय दानारी त्रपश्ये दे
तरां ॥ उपोष्य वे तु ता रात्रीः स्नात्वा शेषं चरेद्धृतमिति ॥ अन्यत्रापि ॥ नियमस्थो
व्रतस्थो च रजः पश्येत्कथं चन ॥ त्रिरात्रे चेद्रजः पश्येद्धृत्वा व्रतशेषं समापयेदिति ॥ अत्रा
शौचे गृहणं रजोग्रहणं चोपलक्षणं ॥ एवं त्याचरितो व्यवस्थेति केचित् ॥ सर्वेषामे
षां नित्यत्वादेकादशीव्रतचरदत्रापि सूतके मध्ये पारणं कर्तव्यमित्यन्ये ॥ मम
तु प्रतिभाति अत्र नवरात्रे भस्य पूजारूपत्वेन प्रधानत्वात् ॥ तस्य चानन्यसाध्यत्वे
नाशौचे असंभवात् ॥ न तु दानादेर्जपमिति निषेधात्तत्संभवात् विनानियमरूपो
पवाससमाप्त्यसंभवादाशौचान्ते होमादिपूर्वकं पारणं कर्तव्यं ॥ प्राचीनशिष्टाचा
रोप्येवमेव ॥ प्रतिमापूजाविधिः पत्रिकापूजाविधिश्चान्यत्र महत्तोतो द्रष्टव्यः ॥ विस्त
रभयान्नालिख्यते ॥ इयमेव विजयादशमी ॥ इयं च यदि उत्तरैव श्रवणयुक्ता त
दैवोत्तरा ॥ उदये दशमी किंचित्संपूर्णा कादशीयदि ॥ श्रवणर्क्षयदा कार्या ताति
थिर्विजयाभिधा ॥ श्रवणर्क्षं तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ॥ उल्लंघयेयुः सी
मानं तद्दिनर्क्षे ततो नराः इति ॥ कश्यपवचनात् ॥ संपूर्णैकादशीति वचनात्तदा

कर्मकालव्याप्तिरनापेक्षापिता॥ अन्यथा सर्वपक्षेषु पूर्वा॥ दशम्यां तु जनैः सम्य
क्पूजनीयापराजिता॥ ऐशानीं दिशिमाश्रित्य अपराह्ले प्रयत्नतोति॥ अपराह्ल
स्य कर्मकालत्वाभिधानात्॥ अस्यां राजाऽथातः प्रस्थानं व्याख्यास्याम इत्यादि
ना गोपथब्राह्मणोक्तं प्रस्थानकविधिं कृत्वा तदुत्तरप्रकारेणापराजितापूजोक्ता कर्त्त
व्या॥ तत्प्रकारश्च मदनरत्नादौ द्रष्टव्यः॥ सर्वैश्च जनैर्नात स्याम पराह्ले ऐशानीं दिश
माश्रित्य सीमानमुल्लंघ्य अपराजिता पूजयेयुः॥ तावैव॥ अद्यास्मिन् शुक्लदश
म्यां क्षेमसिद्ध्यर्थं अपराजितापूजां करिष्य इति संकल्प्य चंदनादिलिखिताष्टदल
मध्ये अपराजितायै नम इत्यपराजितां तद्दक्षिणतः क्रियाशक्त्यै नम इति जयां तद्वा
मतः उमायै नम इति विजयां प्रतिष्ठाप्य॥ ॐ अपराजितायै नमः॥ ॐ जयायै नमः॥
ॐ विजयायै नमः॥ इत्यावाहनादिषोडशोपचारैः संपूज्य प्रणम्य इमां पूजां यथा देवि यथा
शक्त्या निवेदितां॥ रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तममिति विसर्जयेयुः
आज्ञायष्ठेमीं पूजयित्वा॥ अमंगल्यानां शमनीं दुष्कृतस्य च॥ दुःस्वप्नशमनीं धन्यां
प्रपद्येहं शमीं शुभामिति॥ तां प्रार्थयेयुः॥ क्वचिदन्येपि मंत्राः॥ शमी शमयते पा
पं शमी लोहितकंटका॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥ करिष्यमा

५२

णयाज्ञायां यथाकालं सुखं मया ॥ तत्र निर्विघ्नकार्त्री त्वं भव श्रीरामपूजितेति ॥
तथा ॥ गृहीत्वा सा दत्तामाज्ञां रामो मूलेन तामदात् ॥ गीतवादित्रघोषैस्तामानये
त्स्वगृहं प्रति ॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सहेति ॥ ज्योतिषे ॥ कृत्वा नीरा
जनं राजा बलवृद्ध्यै यथाक्रमम् ॥ शोभनं खंजनं पश्येत् जलगोगोष्ठसन्निधाविति ॥
इति विजयादशमी ॥ आश्विनशुक्लैकादश्यां कार्तिकस्नानारंभ उक्तं ॥ पाद्मे का
र्तिकमाहात्म्ये ॥ आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ॥ कार्तिकस्य व्रता
नीह तस्यां वै प्रारभेत्तु धीरिति ॥ विष्णुनाशु तुलासंक्रांतिमारभ्य कर्तव्यमित्युक्तं
॥ तुलामकरमेषेषु प्रातःस्नायी यदा भवेत् ॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनं
मिति ॥ पूर्णिमाश्वियुजे मासि पूर्णिमास्यां समाहितेत्युक्त्वा मासं समयं परायां च
भक्त्या स समाप्यते ॥ कार्तिकपौर्णिमास्यामिति हेमाद्रिलिखितमादिपुराणं प्रामाणि
मारंभप्रमाणं ॥ काशीखंडे ॥ शते समारब्धपक्षं त्वा कृते यत्समवाप्यते ॥ तत्कार्ति
के पंचकेन देसं कृत्स्नानेन लभ्यते ॥ कार्तिके विदुतीर्थे यो ब्रह्मने च ये प्रणयनाः ॥ स्नानस्य
स्य तु दिने भानौ भानुजा स्तस्य भीः कुतः इति ॥ स्नानमंत्रः ॥ कार्तिकेहं करिष्यामि
प्रातः स्नानं जनार्दन ॥ प्रीत्यर्थं देवदेवेश दामोदर मया सहेति ॥ अर्घ्यमंत्रः कार्त्ति ॥

खंडे॥ ॥नित्यनैमित्तिके कुर्यात्कार्तिके पापनाशने॥ गृहाणार्घ्यं मया दत्तं राधया
सहितो हरे॥ इमौ मंत्रौ समुच्चार्य नरोऽर्घ्यं प्रयच्छति॥ सुवर्णरत्नपुष्पाब्जपूर्णशंखे
न पुण्यवान्॥ सुवर्णपूर्णपृथ्वी तेन दत्ता न संशय इति॥ संपूर्णस्नानाशक्तो
ब्रह्मपुराणे॥ कार्तिकमधिकृत्य॥ एकादश्यादिषु तथा तत्र पंचसु रात्रिषु॥ दि
नेदिने च स्नातव्यं शीतकालेषु नदीषु च॥ वर्जितव्यो तथाहि सा मांसमद्यानमेव वे
ति॥ काशीखंडे॥ वाराणस्यां पंचनदे च्यवहः स्नानात्कार्तिके॥ अमीते पुण्यवपु
षः पुण्यभागिनी तिनिर्मला इति॥ तत्रैव॥ कार्तिके मासि मे यात्रायैः कृता भक्तितत्प
रैः॥ बिंदुतीर्थकृते स्नाने स्तेषां मुक्तिर्न दूरतः॥ पाद्ये॥ कार्तिके नार्चितो यैस्तु क
मलैः कमलेक्षणः॥ जन्मकोटिषु विप्रेंद्र न तेषां कमला गृहे॥ नारसिंहे॥ विहा
य पुष्पाणि मुनिपुष्पेण केशवं॥ कार्तिके योर्चयेद्भक्त्या वाजपेयफलं लभेत्॥ पा
द्ये॥ तुलसीदललक्षेण कार्तिके योर्चयेद्धरिं॥ पत्रे पत्रे मुनिश्रेष्ठ लभते मौक्तिकं फ
लं॥ स्कांदे॥ निवेद्य केशवे मालां तुलसीकाष्ठसंभवां॥ वहते यो नरो भक्त्या तस्य
नैवास्ति पातकं॥ विष्णुधर्मे॥ स्पृशेत्तु यानि लोमानि धात्रीमाल्यं को नरः॥
तावद्वर्षसहस्राणि वैकुंठे वसति भवेत्॥ मालायुग्मं तु यो नित्यं धात्रीतुलसि

सर्व

संभवं ॥ वहते कंठदेशे तु कल्पकोटिदिवं वसेत् ॥ तुलसीकाष्ठसंभूते माले कृष्णज
नप्रिये ॥ बिभर्षि त्वामहं कंठे कुरु मां कृष्णवल्लभं ॥ धारयेत्कार्त्तिके यो वै स गच्छेद्वि
ष्णवं पदं ॥ स्कांदे ॥ धात्रीछायां तु यः कुर्यात्पिंडदानं महामुने ॥ मुक्तिं प्रयांति पितरः
प्रसादान्माधवस्य तु ॥ धात्रीफलविलिप्तांगो धात्रीफलकृतविभूषितः ॥ धात्रीफलकृ
ताहारो नरो नारायणो भवेत् ॥ धात्रीछायां समाश्रित्य योऽर्चयेच्चक्रपाणिनं पुष्पपु
ष्पैः सुमेधस्य फलं प्राप्नोति मानवः ॥ तथा ॥ कार्त्तिके वर्जयेत्तद्विदलं बहुबीजकं ॥
माषमुद्गमसूराश्च चणकाश्च कुलित्थकाः ॥ निष्पावा राजमाषाश्च आढक्यो द्विदलं
स्मृतं ॥ अन्तेतेनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् ॥ नारदीये ॥ कार्त्तिके वर्जयेत्तै
लं कार्त्तिके वर्जयेन्मधु ॥ कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्तसंधितं ॥ तथा ॥ का
र्त्तिके केशमसेवीयः प्राजापत्यपरोऽपि वा ॥ एकांतरोपवासी वा त्रिरात्रोपोषितोऽपि
वा ॥ षड्द्वादशरात्रपक्षं वा मासं वा वरवर्णिनी ॥ एकभक्तेन नक्तेन तथैवायाचितेन
वा ॥ उपवासेन मेदोण भजते परमं पदं ॥ काशीखंडे ॥ ऊर्ज्जे यवान्नमश्नीयाद्वा
न्नमथवा पुनः ॥ वृंताकं सूरणं चैव शूकशिंबीश्च वर्जयेत् ॥ नारदीये ॥ अव्रतेन द्वे

58

पेद्युक्तमासं दामोदरप्रियं ॥ तिर्यक्योनिमवाप्नोति नात्र कार्या विचारणा ॥ निर्णया
मृते पौष्टके ॥ तुलायां तिलतैलेन सायंकाले समागते ॥ आकाशदीपं यो दद्यात् मा
समेकं हरिं प्रति ॥ महतीं श्रियमाप्नोति रूपसौभाग्यसंपदः ॥ तद्विधिर्हेमाद्रौ आदि
त्यपुराणे ॥ दिवाकरे स्ताचलमौलिमस्ते गृहाद्दूरे पुरुषः प्रमाणे ॥ यूपाकृतं प्रदीप्य
हृद्ये दारुमारोप्य भूमावथ तस्य मूर्ध्नि ॥ कृताष्टपत्रं स्त्रीष्टदलं हरितेरूपामिहैव
दृष्टं दद्यात्तु कारी ॥ तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयो दलेष्वष्टौ तथाष्टौ ॥
निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराजे ॥ प्रजापतिभ्यस्त्वथ सत्कृति
तभ्यः प्रेतेभ्य एव प्रथनेभ्यस्थितेभ्य इति ॥ आश्विनपौर्णमास्यां कोजागरव्रतं महा
र्णवे लैंगे ॥ आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ॥ कौमोदकी समाख्याता
कार्या लोकविभूतये ॥ कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं ॥ सुगंधि नि
शि सद्वेषः अक्षैर्जागरणं चरेत् ॥ निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ॥ त
स्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोतु यः ॥ नारिकेलैश्चिपिटकैः पितृन्देवान्समर्चये
त् ॥ बंधूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेदिति ॥ मदनरत्ने ॥ नारिकेलोदकं पीत्वा
अक्षैर्जागरणं निशि ॥ तस्मै वित्तं प्रयच्छामि को जागर्तीह महीतले ॥ अत्रैवाश्वयु
जीकर्माहाश्वलायनः ॥ आश्वयुज्यामाश्वयुजीकर्मेति ॥ अत्रैव व्रीह्याग्रयणं हेमा

इदं च आपदि मलेकार्यमन्यथा न कार्यमित्याद्यन्यद्द्रष्टव्यं ॥ अस्याकरणे प्रायश्चित्तं
कारिकायां ॥ अकृताग्रयणोश्रीयान्नैवान्नं यदि वै नरः ॥ वैश्वानराय कर्तव्यश्चरुरप्र
णीद्भुतिस्तु वेति ॥ इत्याश्विनकृत्यं ॥ कार्तिककृष्णचतुर्थ्यां करकाभिधा ॥ सा चंद्रो
दयव्यापिनी ग्राह्या ॥ दिनद्वये तथात्वे पूर्वा ॥ कार्तिककृष्णाष्टमी करकाभिधा मा
हाराष्ट्रेष्वन्येषु च प्रसिद्धा ॥ सापि चंद्रोदयव्यापिनी कार्या ॥ दिनद्वये तथात्वे पूर्वा ॥
कार्तिककृष्णद्वादश्यां गोवत्सद्वादशीव्रतं ॥ तत्प्रदोषव्यापिन्यां कार्यं ॥ नरो वाथ
दिवा नारी नक्ते सकृल्लघुचेतसी तक्रपक्वे माषान्ने कामतोभ्यां यावद्रात्रौ विगतम
त्सरं इत्युक्तेश्च नक्तभोजनविधानात् ॥ प्रतीक्षेतागमं भक्त्या गवां गोध्यानतत्पर
इति ॥ गोष्ठागमनात्तु संध्यायां गोपूजाविधानाच्च ॥ दिनद्वये प्रदोषसत्त्वे युग्मवा
क्यात् ॥ वत्सस्य पूजा शिवरात्रिरेतापराविनिघ्नति नृपं सराष्ट्रमिति वचनेनोत्तरवि
द्धौ निषेधाच्च पूर्वा ग्राह्या ॥ तत्र कर्तव्यमनुक्तं मार्कण्डेयोत्तरे ॥ सवत्सां तुल्यवर्णां च शा
लिनीं गां पयस्विनीं ॥ चंदनादिभिरभ्यर्च्य लेप्य पुष्पमालाभिरर्चयेत् ॥ अर्घ्यं ताम्र
पात्रे कृत्वा पुष्पाक्षततिलैः ॥ चंदनेः कुंकुमेर्गंधैः पुष्पैः कालोद्भवैस्तथा ॥ पाद

मृत्के तु दद्याद्वै मंत्रेणानेन पांडव ॥ मातारुद्राणामित्येमंत्रः प्रोक्तो द्विजन्मनां ॥ त्रिंश
द्राणां महावाहो मन्त्रोपपूरिक्रीर्तितः ॥ क्षीरोदार्णव संभूते सुरासुरनमस्कृते ॥ सर्व
देवमये मातर्गृहाणार्घ्यं नमोस्तुते ॥ दत्वार्घं नजके पुण्ये सालंकृते मुनिभिः दीपैः ॥
ततो माषादि संसिद्धान्वटकांश्च निवेदयेत् ॥ मंत्रः ॥ सुरभि त्वं जगन्मातर्नित्यं विष्णु
पदे स्थिते ॥ सर्वदेवमये ग्रासं न पाश्चत्वमिमं शुभं ॥ प्रार्थनामंत्रः ॥ सर्वदेवमये दे
वि सर्वदेवैरलंकृते ॥ मातर्ममाभिलषितं सफलं कुरु नंदिनि ॥ इति ॥ तद्दिने पिका
पक्वं स्थालीपक्वं युधिष्ठिर ॥ गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् क्षितौ ॥ हेमाद्रौ
आग्नेये ॥ कार्तिके खलु मासो वै सर्वदेवमयो महान् ॥ कृष्णपक्षविशेषेण तत्र पंच
दिनानि तु ॥ तिथिः पूर्वाह्न पूर्वरात्रे न त्वणां नीराजना विधिः ॥ नीराजनं पृथु दैवाश्च विप्रान्
गोश्च तुरंगमान् ॥ ज्येष्ठाञ्ज्येष्ठान्जघन्यांश्च मातृमुख्याश्च योषितः ॥ इति ॥ आश्विन
ग्रहणं मुख्यं चांद्रात्रिमायेण ॥ अमावास्यांतपक्षेण आश्विने कृष्णत्रयोदश्यांपाय
मोद्दीपेन संध्याकाले बहिर्दीपदानं कार्यं ॥ तदुक्तं स्कांदे ॥ अश्वयुक्कृष्णपक्षे तु त्रयो
दश्यां निशामुखे ॥ यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ॥ तत्र मंत्रः ॥ मृत्युना पाश

दंडाभ्यां कालेनामलयासह॥ त्रयोदश्यां दीपदानान्मृत्युजः प्रीयतामिति॥ का
र्तिककृष्णचतुर्दश्यां प्रातरभ्यंगस्नानं कर्तव्यं॥ तदुक्तं भविष्योत्तरे॥ कार्तिके कृ
ष्णपक्षे तु चतुर्दश्यां दिनोदये॥ अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः॥ अपामा
र्गस्य पत्राणि भ्रामयेच्छिरसोपरि॥ अमावास्यांतमासपक्षेण॥ नारदसंहितायाम
पि॥ इषासिते चतुर्दश्यामिंदुक्षयतिथावपि॥ ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली
भवेत्॥ तैले लक्ष्मीर्जले गंगा दीपावलितिथौ वसेत्॥ अलक्ष्मीपरिहारार्थमभ्यं
गस्नानमाचरेत्॥ इंदुक्षयेपि संक्रांतौ वारे पाते दिनक्षये॥ तत्राभ्यंगमदोषाय प्रा
तः पापापनुत्तये॥ तत्र चतुर्दशीतावदभ्यंगे दिनोदये स्नातः शब्दयोः स्नानार्थ
त्वात्स्नातःकालव्यापिनी ग्राह्या॥ क्वचिद्दिनोदये इति पठितं॥ तत्पूर्वसंवादेवाक्यवि
स्नायो दाक्षिणात्याचारसंवादी विघ्नतयई तिपाठः॥ तथा चंद्रोदयकालिकी स्ना
नेयात्वा॥ तत्र यापूर्वेव स्नातश्चंद्रोदये वर्तते सा खंडा सर्वकृत्येषु दीपदानादिषु सम
पीनेवा॥ याल्तेरेव स्नातश्चंद्रोदयव्यावर्तते तेतावत्येव चेत्समाप्ता तस्यां स्नानं यमतर्प
णं च कार्यं॥ ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमाय धर्मराजाय मृत्यवे चां
तकाय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय पर

56

मेष्टिने॥ वृकोदराय चित्राय चित्रगुप्ताय ते नमः इति॥ भविष्योत्तरे॥ अभ्यंगस्नानानं
तरं तर्पणाविधानात्॥ तस्य कालविशेषानुक्तेश्च॥ यदि तु नद्वये पि काळव्यापिनी त
स्यां पूर्वस्यामेव स्नानादि कार्यं॥ संपूर्णत्वात्॥ नृपः कृत्य कमाहुरोधाच्च॥ यदि न
द्वये पि काळास्पर्शिनी सापि पूर्वैव॥ कोळो गौणः पूर्वस्य कर्मणः इत्युक्तेः गौणकालव्या
पित्वात्॥ पूर्वविद्धा चतुर्दश्यां कार्त्तिकस्य सितेतरे॥ प्रत्यूषसमये स्नानं कुर्यान्नित्रप्रय
त्नत इति॥ चंद्रोदये दृष्टे तु चेनाच्च॥ स्नाने तु काळः सोप्यामपि चतुर्दश्यां चंद्रोदय
१वमेवेति॥ तिथ्यादौ चमेवैद्यावानित्युत्तरतिथिक्षये प्रदोषेण शास्त्रे तत्तत्र तिथे
सत्वात्॥ अत्र स्नाने विशेषो ब्रह्मपुराणे॥ अपामार्गमथो तुंबीं प्रपन्नाटमथाप
र॥ भ्रामयेत् स्नानमध्ये तु नरकस्य क्षयाय वै॥ तत्र मंत्रः॥ सीतालोष्ठसमायुक्त स
कंटकदळान्वित॥ हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति॥ मंत्रलिंगात् सीता
लोष्ठस्यापि भ्रामणं पूर्वैः साहित्य॥ यमतर्पणं चोपवीतिना प्राचीनावीतिना वा का
र्यं॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना पवा॥ देवत्वं च पितृत्वं च यमस्यास्ति द्विरू
पतेति मे वचनात्॥ हेत्रादिबळाबल्कोभस्म तिळसके त्रिरावृत्यादिरूपं देवपित्र्य
धर्मविकल्पो द्रष्टव्यः॥ हेमाद्रौ भविष्योत्तरे॥ इति स्नात्वा प्रदातव्यो दीपः सप्रज्य

देवताः॥ क्वचिदिति स्नाते त्वस्य स्नानेन नरकाय नरकासुरोद्देशेनेति बहवः॥ क्वचिन्म
हाराष्ट्रार्थसिद्धिमद इति वचनेन प्रयोजनत्वेन व्याख्यातं॥ तत्रैव॥ ततः प्रदोषसमये दी
पान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति॥ यदा पूर्वदिने प्रदो
षे चतुर्दशी स्नानयोग्या चोत्तरदिने तदा पूर्वदिने प्रदोषदीपादिनादि कृत्वा परे
द्युः स्नाने कार्यं क्रमानुरोधेन कालबाधस्यान्याय्यत्वात्॥ ज्योतिषग्रंथे॥ तुला
संस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्श
नं॥ तत्रोल्काग्रहणमंत्रः॥ शस्त्राशस्त्रहतानां च भूतानां भूतदर्शयोः॥ उज्ज्वलज्यो
तिषा देहं व्योमवह्निनेति॥ तद्दाने॥ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम॥
उज्ज्वलज्योतिषा दग्धास्ते यांतु परमां गतिं॥ तद्विसर्जने॥ यमलोकं परित्यज्य आग
ता ये महालये॥ उज्ज्वलज्योतिषा वर्त्म प्रपश्यंतो व्रजंतु ते इति॥ अन्यदपि कृत्यं ले
गे॥ ततः प्रेतचतुर्दश्यां भोजयित्वा तपोधनान्॥ शैवान्विप्रान्धर्मपराः शिवलो
के महीयते॥ माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः॥ प्रेतचतुर्दशीकाले सर्वपा
पैः प्रमुच्यते॥ नक्तं प्रेतचतुर्दश्यां यः कुर्याच्छिवतुष्टये॥ न तत्क्रतुशतेनापि प्राप्य
ते पुण्यमीदृशमिति॥ अमायामपि प्रातरभ्यंगस्नानं कार्यं॥ एवं प्रभातसमये त्व

मास्यां नराधिप॥ स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च॥ अभिषेकोत्तरा
ता॥ नारदेनापि तिथितत्त्वे दीपावलौ नाभिधायतत्र तैले लक्ष्मीरित्यादिना भ्यग
स्नाने विहिते। पोष्ठरास्वामिनेरवाबिंदुर्यदि स्वातियुतो भवेत्॥ पंचत्वगुरुदके स्नायी
कृताभ्यंगविधिर्नरः॥ नीराजितो महालक्ष्मीमर्चयेच्छ्रियमश्नुते इति॥ अमावा
स्यां कर्तव्यदीपदानं तु कृत्वा पार्वणश्राद्धमित्यभिधाय ततो राजकृत्यमध्ये दीप
मालाकुबेरम्पेविस्तरधूतं सेचयेत्॥ प्रदोषे दोषरहिते शस्ते दोषागमे शुभे इत्यभि
धानाच्छ्राद्धानंतरं कर्तव्यमिति यद्यपि प्रतीयते श्राद्धदिने प्रदोषव्यापिन्यास्तस्यां तत्से
भवत्येव॥ तथापि यदा पूर्वेद्युरेव प्रदोषव्यापिन्यमावास्या श्राद्धयोग्या च द्वितीय
दिने तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीसंपूज्य दीपदानं कार्यं॥ दिवा तत्र मोक्षव्यम्ते वा
त्वात् तु राज्ञेनातो प्रदोषसमये लक्ष्मीपूजा प्रतीत्वात् ततः क्रमात्॥ दीपवृक्षास्तथा का
र्याः शक्त्या देवगृहेषु च इत्यादिपुराणेन तस्य प्रदोषकालत्वाभिधानात्॥ काले विरो
धे च क्रमस्यानादरणीयत्वात्॥ परमार्थतस्तु स्वकाले प्राप्तश्राद्धानुवादत्वात् क्रम
स्याचाविधानमेवेति॥ ज्योतिर्लिंगिकारवंडेति परेव प्रायोव्यवहारविषयत्वे न तस्य प्राप्त
त्वात्॥ यदा तु दिनद्वये प्रदोषव्यापिन्यामावास्या तदोत्तरा॥ युग्मवाक्यात्॥ दंडैके

रजनीयोगो दर्शस्य स्यात्कदाचन ॥ तदा विहाय पूर्वेद्युः परेद्युः सुखरात्रिकेति तिथि
तत्त्वोदाहृतवचनात् ॥ तत्र लक्ष्मीपूजनं तु ॥ लक्ष्म्यै नम इति नाममंत्रेण कार्यं पूजा
नंतरं प्रार्थना ॥ नमस्ते सर्वदेवानां वरदासि हरिप्रिया ॥ या गतिस्त्वत्प्रपन्नानां सा
मे भूयात्त्वदर्चनादिति ॥ तथा ॥ सुखरात्र्यां प्रदोषे तु कुबेरं पूजयेति वै ॥ तन्मंत्रः ॥
धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ॥ भवंतु त्वत्प्रसादान्मे धनधान्यादि
संपद इति ॥ दीपदाने मंत्रः ॥ अग्निर्ज्योतिरविर्ज्योतिश्चंद्रज्योतिस्तथैव च ॥ उत्तमः
सर्वज्योतीनां दीपोयं प्रतिगृह्यतामिति ॥ एवं दीपान्दत्वा दीपवृक्षांश्च कृत्वा
ब्राह्मणानन्यांश्च बुभुक्षितान्भोजयित्वा स्वयमेव कृतो बंधुभिः सह भुंजीत
ब्राह्मणान्भोजयित्वा संभोज्य च बुभुक्षितान् ॥ अलंकृतेन भोक्तव्यं नववस्त्रोप
शोभिना ॥ स्निग्धैर्मुग्धैर्विदग्धैश्च निवृत्तैर्बांधवैः सहेति ॥ आदित्यपुराणात् ॥
मदनरत्ने भविष्ये ॥ एवं गते निशीथे तु जने निद्रार्धलोचने ॥ तावन्नगरनारीभिः
शूर्पडिंडिमवादनैः ॥ अपि डिंडिमवादनैरिति क्वचित्पाठः ॥ निष्काष्यते निशीप्र
हृष्टाभिरलक्ष्मीः स्वगृहांगणादिति ॥ अन्यदपि कृत्यमुक्तं विष्णु ॥ सुखरात्रेरुषः

कालेप्रदीपोज्वलिताश्रये ॥ सर्वान्वे घृतवंधस्त्रुवा चाकुशलपार्च्ये तत्र दीप
वेदनेकार्यं लक्ष्मीमंगम हे तवे ॥ गोरोचनाक्षतैश्चैव दद्याद्गेहेषु सर्वतः ॥ विश्वरू
पस्य मायासि पुष्पप्रदायेशुभे ॥ महालक्ष्मी नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतं ॥ सुखरात्रिप्रभाते च तन्मे लक्ष्मी व्यपोहतु ॥
या रात्रिः सर्वभूतानां या च देवेष्ववस्थिता ॥ संवत्सरप्रिया या च सा ममास्तु सुमंग
ला ॥ माता त्वं सर्वभूतानां देवानां सृष्टिसंभवा ॥ आख्याता भूतले देवि सुखरा
त्रि नमोस्तुते ॥ एतदुक्त्वा र प्रतिप्रद्यपि दीपावलीत्वा स्नातरभ्यंगस्नानं कृत्वा घृ
तादि कर्तव्यं ॥ तथा चादित्यपुराणे ॥ शंकरस्तु पुरा घृते समर्जस्तु मृनो हरे ॥ कार्ति
के शुक्लपक्षे तु प्रथमे हनि सत्यवान् ॥ जितश्च शंकरस्तत्र जयं लोभे च पार्वती ॥
अतो यं शंकरो दुःखी सुमानित्यं सुखोचिता ॥ तस्माद् घृतं प्रकर्तव्यं प्रभाते तत्र मा
नवैः ॥ तस्मिं घृते जयो यस्य तस्य संवत्सरं जयः ॥ पराजये विरुद्धं तु लब्धनाशस्त
तो भवेत् ॥ श्रोतव्यं गीतवाद्यादि स्वनृत्ये पेः स्वलंकृतैः ॥ विशेषवस्त्रभोग्यं शश
स्तैबोधवैः सह ॥ तस्यां निशायां कर्तव्यं सुखशय्या सुशोभना ॥ धैव स्त्रैस्तथापु

४८

घोरत्नैर्माल्यैरलंकृतं ॥ दीपमालापरिक्षिप्तं तथा धूपेन धूपितं ॥ दयिताभिस्सु
सहितेनैर्यामात्रं सवेन्निशां ॥ नवैर्वस्त्रैश्च संपूज्या द्विजसंबंधिबांधवाः इति ॥ भवि
ष्योत्तरे ॥ यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर ॥ हर्षदैन्यादिरूपेण तस्य वर्षं
प्रयाति हि ॥ रुदिते रोदते वर्षं हृष्टो वर्षं प्रहृष्यति ॥ भुक्तो भोक्ता भवेद्वर्षं स्वस्थः स्व
स्थो भविष्यति ॥ तस्मात्प्रहृष्टैस्तु कर्तव्या कौमुदी नरैः ॥ वैष्णवी दानवी
येयं तिथिः पैत्री युधिष्ठिर ॥ तत्रैव लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतं
दुलैः ॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ॥ बलिमुद्दिश्य दीयंते दाना
नि कुरुनंदन ॥ यानि तान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितमिति ॥ अत्र यद्यपि
बलिपूजायां कालविशेषो नोक्तस्तथापि राजकर्तव्यतत्पूजायां कालत्वेन तत्सर्वं मे
वेहात्रौ दैत्यपतेर्बलेः ॥ पूजा कुर्यान्नृपः साक्षाद्भूमौ मंडलके कृते ॥ बलिमा
लिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः ॥ सर्वाभरणसंपूर्णं विंध्यावल्या समन्वितं ॥
कूष्मांडबाणजंभोरुदानवैस्संवृतं ॥ संपूर्णं हृष्टवदनं किरीटोत्कटकुंडलं ॥ द्वि
भुजं दैत्यराजानं कारयित्वा नृपः स्वयं ॥ गृहस्य मध्ये शालायां विशालायां त

तोर्चयेद्दितिरात्रेः कालव्याभिधानात्सर्वेषामपि स एव कालः ॥ अथ लेतंदुलनिर्मि
पाप्रतिमापितादृश्येवा ॥ बलिपूजायां मंत्रो वामनपुराणे ॥ बलिराजनमस्तुभ्यं
विरोचनसुतप्रभो ॥ भविष्येंद्र सुराराते पूजेयं प्रतिगृह्यतामिति ॥ बल्युद्देशेन
दीपदानमुक्तं ॥ तत्रैव वामनेन कर्तक बलिवरदानव्याजेन ॥ वीरप्रतिपदं प्राप्य
तव मार्गी महोत्सवः ॥ तत्रत्वा नरस्त्रीदृढ हृष्टाः पुष्टाः स्वयं कृताः ॥ अर्घ्यदीपप्रदा
नेनअर्चयिष्यंतिमानवा इति ॥ इयं च प्रतिपद्बलिपूजने पूर्वविद्धा ग्राह्या ॥ का
लव्याप्ति फलाभावात् ॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥ पूर्वविद्धैव कर्तव्या
शिवरात्रिर्बलेर्दिनमिति ॥ वचनाच्च ॥ गोपूजनादावपि पूर्वविद्धैव ॥ प्रतिपद्दर्श
संयोगे क्रीडनं तु गवां मतं ॥ परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः ॥ या कुहूः प्र
तिपन्मिश्रा तत्र गाः पूजयेन्नृप ॥ पूजयेत्त्रीणि वर्द्धन्ते प्रजा गावो महीपतिरिति
देवलवचनात् ॥ यद्यपि पूर्वाह्णे क्रीडनं गवामिति वचनात्तत्रातः कालव्यापिन्युत्तरे
द्युर्गोक्रीडनादौ ग्राह्येति प्रतिभाति तथापि गवां क्रीडादिने यत्र राज्ञो दृश्येत चंद्रमाः ॥
सोमो राजा पशून्हंति सुरभी पूजकांस्तथेति ॥ देवलेन प्रतिषिद्धत्वात्तत्रनेया

लं

त्वा ॥ चंद्रदर्शनाभावे कश्चिदुत्तरापि ग्राह्यत्वेनोक्ता ॥ त्रियामगा दर्शतिथिर्न
चेत्साहित्रियामा प्रतिपद्दिनस्थ ग्रह्या ॥ दीपोत्सवे तेमुनिभिः प्रदिष्टे अतोन्यथा पू
र्वे पुते विधेये इति ॥ निर्णयामृते स्कांदे ॥ प्रातर्गोवर्धनं पूज्य द्यूतं चापि समाच
रेत् ॥ मंडनीयाश्च ता गावः पूज्याश्चा वाहदोहना इति ॥ गोवर्धनपूजामंत्रः
॥ गोवर्धन धराधार गोकुलत्राणकारक ॥ विष्णुबाहुकृतोच्छ्राय गवां कोटि
प्रदो भव ॥ इति गोपूजामंत्रः ॥ लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ॥
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ अग्रतः संतु मे गावो गावो मे संतु पृष्ठ
तः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहमिति ॥ कार्त्तिके शुक्लपक्षे तु विधान
द्वितयं भवेत् ॥ नारी नीराजने प्रातः सायं मंगलमालिकेति ॥ ब्रह्मपुराणोक्ते
तल्के मीदृये स्वल्प्यायामपि द्वितीयाविद्धायामपि द्वितीयाविद्धायामेव प्रति
पदि कर्तव्यं ॥ लेम्युतय दिवा प्रातः प्रतिपद्घटिकाद्वयं गतस्यां नीराजनं का
र्यं सायं मंगलमालिकेति ॥ भविष्यत्पुराणे ॥ कार्तिके शुक्लपक्षे दावमा

स्या घटिका द्वयं॥ देशामंगळयान्नैव कुर्यान्मंगलमालिकामिति देवीपुराणे
॥ अमायुक्ता यानिषेधाच्च॥ कार्त्तिकशुक्लद्वितीया यमद्वितीया॥ तस्यामात्मप्र
जनेकार्यं॥ तथा लिंगपुराणे॥ कार्त्तिके शुद्वितीयायां शुक्लायां भ्रातृपूजनं
यानकुर्याद्विनश्यंति भ्रातरः सप्तजन्मसु॥ तस्यां इति विशेषः॥ भविष्योत्तरे॥
कार्त्तिके शुक्लपक्षेतु द्वितीयायां युधिष्ठिर॥ यमोयमुनयापूर्वं भोजितः स्वगृ
हे स्वयं॥ अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर॥ अस्यां निजगृहे पार्थ
न भोक्तव्यमतो बुधैः॥ यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं॥ दानानि च
प्रदेयानि भगिनीभ्यो विशेषतः॥ स्वर्णालंकारवस्त्राणि पूजासत्कारभोज
नैः॥ सर्वा भगिन्यः संतर्प्या अभावे प्रतिपन्नकाः॥ प्रतिपन्नकाः प्रतिपन्नाः भ
गिनीत्वेन व्यवहृता इत्यर्थः॥ मित्रभगिन्य इति हेमाद्रिः॥ तथा यमं चित्रगुप्तं
यमदूतांश्च पूजयेत्॥ अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः॥ भ्रातृभगिनी
भिरित्यर्थः॥ अर्घ्यमंत्रः॥ एह्येहि मार्तंडज पाशहस्त यमांतकालोकधरामरे

रुः॥ भ्रातृद्वितीयाकृतदेवपूजां॥ गृहाणार्घ्यं भगवन्नमस्ते॥ पूजानंतरं प्रार्थ-
यामि मंत्रः॥ धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज॥ पाहि मां किंकरैः सार्धं सू-
र्यपुत्र नमोस्तु ते॥ यमस्वर्नेनमस्तोस्तु यमुने लोकपूजिते॥ वरदा भव मे नित्यं
सूर्यपुत्री नमोस्तु ते॥ इति॥ क्वचित्स्वातु भोजनदानमंत्रः॥ भ्रातुस्तवानुजाताहं भुं-
क्ष्व भक्तमिमं शुभं॥ प्रीतये यमराजस्य यमुनाया विशेषतः॥ इति॥ ज्येष्ठा तु भ्रात-
स्तवाग्रजाहमिति पठेत्॥ कार्तिकशुक्लचतुर्थ्यां नागव्रतं॥ तथा च कार्तिकशु-
क्लपक्षस्य कौर्मे॥ तिथौ युगांमपायांतु समुपोष्य यथाविधि॥ शेषवासुकादिना-
गानां शेषस्य च महात्मनः॥ पूजा कार्या पुष्पगंधधूपैः स्थापनपूर्वकमिति॥ ए-
तच्चैव मध्याह्नव्यापिन्यां कार्यं॥ युगं मध्ये दिने यत्र तत्रोपोष्य फणीश्वरान्॥ क्षीरे-
णाप्याय्य पंचम्यां पारयेत्प्रयतो नरः॥ विषाणि तस्य नश्यंति न तं हिंसंति पन्न-
गाः॥ इति॥ स्कंदपुराणात्॥ कार्तिके शुक्लषष्ठ्यां कृत्यविशेषमाह विष्णोत्तरे॥ ष-
ष्ठ्यां फलाशनो राजन् विशेषात्कार्तिके नृप॥ राज्यच्युतो विशेषेण स्वराज्यं ल-
भते तेपि राजन्॥ दत्वार्घ्यं कार्तिके पायस्थित्वा वेदद्विजमुखः॥ दध्ना घृतोदकैः

पुष्पैर्मंत्रेणानेन तु शुभ्रेन ॥ समर्पिदारज स्कंदसेनाधिप महाबल ॥ रुद्रो मार्गिज
षड्वक्त्र गंगागर्भ नमोस्तु ते ॥ प्रीयतां देवसेनानीः संपादयतु हृद्गतं ॥ दत्वापि प्रा
पचो मार्गेयश्चान्यद् पि वर्तते ॥ पश्चाद्गुल्के त्वे सोराज्यां अर्मि कृत्वाशु भोजनं मि
ति कार्त्तिकशुक्ले नवम्यां युगादिः ॥ नित्ये पूर्वमुक्तं ॥ अस्यामेव विष्णुत्रैरात्रं
मः ॥ हेमाद्रौ पद्मपुराणे ॥ कार्त्तिके शुक्लेनवम्यामवाप्य विजितेन्द्रियः ॥ हरिं वि
धाय सौवर्णं तुलस्या सहितं विभुं ॥ पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयं ॥
एवं यः पाक विधिना कुर्याद्वैवाहिकं विधिमिति ॥ कार्त्तिकशुक्लैकादशी ना
रदीये ॥ कार्त्तिके शुक्लपक्षे तु कृत्वा ह्येकादशीं नरः ॥ प्रातर्दत्वा शुभान्कुंभा
न्स याति हरिमंदिरं ॥ मदनरत्ने वाराहे ॥ शुक्लपक्षे च मन्या ॥ एकादशी सोम
युक्ता कार्त्तिके मासि मामिनि ॥ उत्तराभाद्रसंयोगे अनंता सा प्रकीर्तिता ॥ तस्यां
यः क्रियते मह्ये सर्वमानन्त्यमश्नुते ॥ अनन्त पुण्यफलदा तेनानेता स्मृता प्रिये इ
ति ॥ अस्यामेव प्रबोधोत्सवं कार्यो ब्राह्मे ॥ एकादश्यां च शुक्लायां कार्त्तिके मा
सि केशवं ॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥ नृत्यैर्गीतैस्तथा वाद्यैः

गपत्तुः सामगंगछे॥ वीणापाणहराँदेश्चपुराणश्रवणेन च॥ वासुदेवकथाभि
श्च स्तोत्रैरन्यैश्च मानवैरिति॥ मयि विष्णौ तरेषु॥ कार्त्तिकेशुक्लपक्षस्य एकादश्यां
समाहितः॥ मंत्रेणानेन राजेन्द्र देवमुत्थापयेद्द्विजः॥ वराहपुराणे तु द्वादश्यां
प्रबोधोत्सवमुक्तः॥ रामार्चनचंद्रिकायामपि॥ पारणाहे पूर्वरात्रे घटादीवाद
यन्मुहुरितिम प्रबोधमेत्रावाराहे॥ ॐ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभि
र्वंदितवंदनीयः॥ बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव॥ इयं
तु द्वादशी देव प्रबोधार्थं तु निर्मिता॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना॥
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं॥ उत्थिते चेष्टिते सर्वमुत्तिष्ठोत्तिष्ठ मा
धव॥ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते॥ त्वयि सुप्ते जगत्सुप्तमुत्थिते चो
त्थितं जगदिति॥ एवं प्रबोध्य पुष्पांजलिं दद्यात्॥ तत्र मंत्रः॥ गंगागमेधाविपचे
वनर्मलोनिर्मकादिशः॥ ग्रारदानि च पुष्पाणि गृहाण मम केशव इति॥ अ
स्यामेव चातुर्मास्यव्रतसमाप्तिः॥ तदुक्तं वाराहे॥ चतुरोपि हितचीर्णचा
तुर्मास्यव्रतेनरः॥ कार्त्तिकेशुक्लपक्षे तु द्वादश्यां तत्समापयेदिति॥ पंउहो

एकादशी पूर्णिमा कर्क संक्रांति शुक्रवार इत्यर्थः॥ भविष्योत्तरे॥ चातु
र्मास्ये तु यत्यक्तं भक्ष्यभोज्यादिकं च यत्॥ चतुर्वार्षिका मासान्नियमोन
यस्य यत्कृतं॥ कथयित्वा द्विजेभ्यस्तद्दद्यात्सदक्षिणं॥ दत्वा विसर्ज
येद्विप्रांस्तान्भुंजीत च स्वयमिति॥ वृतमाप्नेमंत्रः॥ सनत्कुमार एणोक्तं॥
इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द
नेति॥ अस्यां रेवती नक्षत्रांत्यपादयोगे पारणेन कार्या॥ सुप्तिप्रबोधपरिवर्त
नमेव वर्ज्यमिति प्राग्लिखितवचनात्॥ इदं चेष्टकास्तादावपि कार्यं निपत
कालस्वात्॥ इयं च मन्वादिः॥ क्रतुपप्तवीर्ह्वव्यापिनी यान्घ्या॥ कार्तिक शुक्ल
चतुर्दश्यां पूर्वेद्युर्दिने कृतोपवासः॥ अरुणोदयेमणिकर्णिकायां स्नात्वा विश्वेश्व
रं पूजयेत्॥ तेस्यां विश्वेश्वरप्रतिष्ठादिनत्वात्॥ तथा च सनत्कुमारसंहितायां
॥ नेदिके श्वेउवाच॥ वर्षे च हेमलंबाख्ये मासे श्रीमति कार्तिके॥ शुक्लपक्षे
चतुर्दश्यामरुणाभ्युदयं प्रति॥ महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके॥
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत्॥ सदौ पंज्योतिषस्तस्य प्रतिष्ठा

दिने त्वां तु ॥ एवं तदा करोतु ॥ ततः प्रभाते विमले स्नात्वा पूजां महाकृतां ॥ दंडपा
णिर्महाधार्मिक वनेऽस्मिन्कृतपारणा इति ॥ अत्र अन्यद्येवं कुर्यादिति परकृति
रूपेणार्थवादेन विधिः कल्प्यते ॥ काशीखंडे ॥ कार्त्तिकस्य चतुर्दश्यां विश्वे
शो यो विलोकयेत् ॥ स्नात्वा चोत्तरवाहिन्यां न तस्य पुनरागतिः ॥ इयमेव वैकु
ठसंज्ञा ॥ अस्यां रात्रौ सोपवासेन हरिपूजनं कार्यं ॥ तदुक्तं हेमाद्रौ भविष्ये ॥
कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप ॥ सोपवासस्तु संपूज्य हरिं रात्रौ जि
तेंद्रिय इति ॥ अत्र कर्मकालव्यापित्वाद्रात्रिव्यापिनी ग्राह्या ॥ अत्रैव कार्त्ति
कव्रतोद्यापनमुक्तं पाद्मे कार्त्तिकमाहात्म्ये ॥ अथोर्जव्रतिनः सम्यगु
द्यापनविधिं शृणु ॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥ व्रतसंपूर्ण
तार्थाय विष्णुप्रीत्यर्थमेव च ॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभां ॥
द्वारेषु द्वारपालांश्च पूजयेन्नामतः पृथक् ॥ पुण्यशीलं सुशीलं च जयं वि
जयमेव च ॥ तुलसीमूलदेशे तु सर्वतोभद्रमेव च ॥ तस्योपरिष्टात्कलशं पं

चरत्नसमन्वितं ॥ पूजयेत्तन्नदेवेशं शंखचक्रगदाधरं ॥ पीतकौशेयवस
ने पुंकेजलधिकन्यया ॥ इंद्रादिलोकपालांश्च मंडले पूजयेद्व्रती ॥ तस्या
मुपवसेद्भक्त्या शांतश्च यतमानसः ॥ पूजयेद्देवदेवेशं सौवर्णं गुर्वैतुष्ट
या ॥ रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ॥ ततस्तु पौर्णमास्यां वै स
पत्नीकान्द्विजोत्तमान् ॥ पत्र शक्तितान्नथैकं वा स्वशक्त्या वा निमंत्रयेत् ॥
अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं ॥ ततो गां कपिलां दद्यात्पूजये
द्विधिवद्गुरुं ॥ सपत्नीकान्समभ्यर्च्य नत्वा विप्रान्क्षमापयेत् ॥ पुष्पमस्त
दा देवेशः प्रसन्नो भव सर्वदा ॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥
तत्सर्वं नाशमायातु स्थिरा सन्तु च सन्ततिः ॥ इति क्षमाप्य तान्सर्वान्संसाध
च विसर्जयेत् ॥ ताम्रचंपूं गुरवे दद्यादुपक्रान्तदा व्रती ॥ ततः सुहृत्कुलयुतः
स्वयं भुंजीत मौनमिमानिति ॥ कार्तिकीपौर्णमासीयं सामान्यनिर्णयात्परा ॥
इयं च मन्वादिः ॥ अत्र विशेषो हेमाद्रौ ब्राह्मे ॥ पुण्यामहाकार्तिकीस्याज्जी

वृंदेः कृत्तिकास्थयोः॥ पाद्मे॥ विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः॥ स
योगः पद्मकोनाम पुष्करे त्वतिदुर्लभः॥ पद्मकं पुष्करं प्राप्य कपिलां यः प्रयच्छ
ति॥ स हित्वा सर्वपापानि वैष्णवं लभते पदं॥ यमः॥ कार्त्तिक्यां पुष्करे स्नातः
सर्वपापैः प्रमुच्यते॥ अन्यत्रापि॥ आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्व
चित्॥ महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा॥ यदा तु याम्यं भवति ऋ
क्षं तस्यां तिथौ क्वचित्॥ तिथिः सापि महापुण्या मुनिभिः परिकीर्तिता॥ प्रा
जापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप॥ सा महाकार्त्तिकी प्रोक्ता देवानाम
पि दुर्लभेति॥ अस्यामेव संध्याकाले त्रिपुरदाहोत्सवो भार्गवार्चने दीप
का यो॥ पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः॥ दद्यादनेन मंत्रेण प्र
दीपांश्च सुरालये॥ कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जी
वाः॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि विप्राः इति॥ अ
स्यामेव मत्स्यावतारः॥ उक्तं पाद्मे कार्त्तिकमाहात्म्ये॥ वरं दत्वा यतो विष्णुर्म

त्यरूपभवतु ते ॥ तस्यां दत्तं हुतं जप्तं तदक्षयफलं स्मृतमिति ॥ अस्यां वृषोत्स
र्गं कृत्वा नक्तं कार्यं ॥ उक्तं मात्स्ये ॥ कार्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाच
रेत ॥ शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति ॥ पृथ्वीमांते मार्गशीर्षकृष्णा
ष्टम्यां मपराह्ने भैरवोत्पत्तिः ॥ पत्र ॥ नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते
रवाविति शिवरहस्ये तन्मध्ये बहूकृत्याभिधानादविनादविरुद्धं ॥ काशीखं
डे ॥ मार्गशीर्षासिताष्टम्यां कालभैरवसंन्निधौ ॥ उपोष्य जागरं कुर्वन्सर्वपा
पैः प्रमुच्यते ॥ त्रिस्थलीसेतौ ॥ कृत्वा च विविधां पूजां महासंभारविस्तरैः ॥ नरो
मार्गसिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ॥ अत्र उपावीसौघदानं जागरणं रा
त्रौ यामचतुष्टये पूजयेत्यादि शिवरहस्योक्तं ॥ इयं च पूर्वविद्धा ग्राह्या ॥ हेमा
द्रौ ॥ गृहीत्वा दुग्धव्रतं त्वाकालव्यापिनी लोभाच्च ॥ मार्गशुक्लपंचम्यां नागपूजोक्ता
स्कांदे ॥ शुक्लो मार्गशिरः पुण्यः श्रावणो यश्च पंचमी ॥ स्नानदानैर्बहुफला ना
गलोकप्रदायिनीति ॥ इयं चोत्तरविद्धा कार्या ॥ पंचमी नागपूजायां कार्या ष
ष्ठीसमन्विता ॥ तस्यां तु तोषिता नागा इतरा सचतुर्थिकेति वचनात् ॥ ॥ मार्गशुक्ल

५४

क्लेशाष्टयामल्लारिप्रभा ॥ ॥ सा चोत्तरविद्धायां कार्या षण्मुखप्रियेति युग्मवाक्या
त् ॥ इयमेव योगविशेषेण चंपाभिधा ॥ तदुक्तं मल्लारिमाहात्म्ये ॥ मार्गे भाद्रप
देशुक्ला षष्ठी वैधृतिसंयुता ॥ रविवारेण संयुक्ता सा चंपेतीह कीर्तितेति ॥ अयं
योगवशेन पूर्वा परा वा ग्राह्या ॥ इयमेव स्कंदषष्ठी ॥ सा च पूर्वा ॥ कृत्वाष्टमीस्कं
दषष्ठ्यौ शिवरात्रिं चतुर्दशी ॥ एताः पूर्वयुताः कार्या इति वचनात् ॥ मार्गशुक्ले चतु
र्दश्यां कार्या पिशाचमोचनयात्रा ॥ मार्गपौर्णमास्यां दत्तात्रेयोत्पत्तिः ॥ तदुक्तं
स्कांदे सह्याद्रिखंडे ॥ मार्गशीर्षे तथा मासि दशमेह्नि सुनिर्मले ॥ मृगशीर्षयुते या
गे पौर्णमास्यां हि वासरे ॥ जनयामास देदीप्यमानं पुत्रं सती शुभं ॥ तं विलक्ष्य मा
गते ज्ञात्वा अत्रिर्नामाकरोत्स वै ॥ दत्तवान्स्वस्य पुत्रत्वाद्दत्तात्रेयमतीश्वरमिति
॥ दशमे मासि लिख्यते इयं पूर्वविद्धा ग्राह्या ॥ कृष्णसमो चाकरात् ॥ अमांतमा
सपक्षेण मार्गकृष्णाष्टमीष्टका हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्ट
मीष्वष्टका इत्याश्वलायनवचनात् ॥ तत्पूर्वेदिने पूर्वेद्युः श्राद्धं ॥ उत्तरदिनेन्व

न्वष्टक्यं ॥ पूर्वेद्युः पितृभ्यो दद्यात् ॥ अपरेद्युरन्वष्टक्यमित्याश्वलायनसूत्रा
त् ॥ अत्राष्टमी अपराह्णव्यापिनी ग्राह्या ॥ पूर्वेद्युरन्वष्टक्यं योस्त्वष्टम्यनुरोध
ने निर्णयः ॥ अत्र श्राद्धं शाकेन वाश्वलायनः ॥ अप्पने तु होयवसमाहरेदग्नि
नावाकक्षेमुपोषेद्देशामेष्टकेति नवेवानष्टकस्यादिति ॥ श्राद्धाकरणे प्राय
श्चित्तमुक्तं ॥ नेविधाने ॥ एमिद्युलिर्जपेन्मंत्रं शतवारं तु तद्दिने ॥ अन्वष्टक्यय
दाश्वलन्यंसपूर्णयातिसर्वथेति ॥ मार्गादिषु मकमासपाते तत्राष्टकानेकार्या
॥ चतुर्दशमित्युक्तं ॥ नारायणवृत्तौ ॥ महोलयाष्टकाश्राद्धोपाकर्माद्यपिकर्म

क

यत् ॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलं इति ॥ कारकगृत्याच्छं ॥ ॥
इति मार्गकृत्यं ॥ पौषशुक्लकृष्णयोर्विशेषः ॥ कृत्यकल्पतरौ भविष्ये ॥ पौषमा
सि यदा देवि शुक्लाष्टम्यां बुधो भवेत् ॥ तस्यां स्नानं जपो होमस्तर्पणं विप्रभो
जनं ॥ महत्रीतये कृतं देवि शतसाहस्रिकं भवेत् ॥ अत्र रोहिण्यार्द्रायोगे पुण्य
तमत्वं ॥ पौषशुक्लैकादशी मन्वादिः ॥ अस्यां मेवमाघस्नानारंभोक्तो ब्राह्मे

५५

एकादश्यां शुक्लपक्षे पौषे मासे समारभेत्॥ द्वादश्यां पौर्णमास्यां वा शुक्ल-
पक्षे समापयेदिति॥ माघ इति विशेषः॥ पद्मोत्तरमाह विष्णुः॥ दर्शे वा पौर्ण-
मास्यां वारभ्य स्नानं माघे चरेत्॥ पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे
इति॥ सत्यव्रतः॥ तुला मकर मेषेषु प्रातःस्नायी सदा भवेत्॥ हविष्यं ब्रह्मचर्यं
च महापातकनाशनमिति॥ स्नानकालस्तु ब्राह्मे॥ अरुणोदये समारभ्य
स्नानकालो विचक्षणः॥ माधवांघ्रियुगं ध्यायेत् यः स्नायी सुरपूजित इति॥ अ-
रुणोदयमारभ्य प्रातःकालावधिर्मतो॥ माघस्नानव्रतां पुण्यं क्रमोत्तरमुच्य-
धारणा॥ उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमं॥ सवितर्युदिते भूप ततो हीनं
प्रकीर्तितमिति॥ एवं सति॥ संप्राप्ते माघमासे तु तपस्विजनवल्लभे॥ क्रोशं-
ति सर्ववारीणि समुत्तिष्ठति भास्करे॥ माघमासे रटंत्यापः किंचिदभ्युदिते
रवावित्यादि॥ नारदीयादिवचनात्॥ अशक्तविषयाणि तथा तत्रैव॥ तडा-
गेषु हुवा स्नायात् कूपे भांडास्थिते तथा॥ माघमासे वरारोहे स्नात्वैवं निम्नगा-

७५

जलं॥ भांडाश्रिते त्वयं विशेषः॥ सरित्तोयं महावेगं नवकुंभस्थितं तथा॥ वायुना
ताडितं रात्रौ गंगास्नानसमं स्मृतं॥ स्नातो वह्निं न सेवेत त्यक्त्वा तोयाकंपं चेन्ना
सेवेतापि तत् होमार्थं न शीतार्थं कथंचन॥ स्नानविधिमाह विष्णुः॥ तत्र चोत्थ
यनियमग्रहणीयाद्विधिपूर्वकं॥ माघमासमिमं पूर्णं स्नास्येहं देव माधव॥
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि॥ ततः स्नात्वा शुभे तीर्थे दत्त्वा शिर
सि वै स्मृतं॥ वेदोक्तविधिना राजन् स्नात्वा यार्घ्यं निवेदयेत्॥ पितॄणां तर्पयित्वा
तु अवतीर्य ततो जलात्॥ शंखचक्रधरं देवं माधवं नाम पूजयेत्॥ वह्निं हुत्वा
विधानेन ततस्त्वेकाशनो भवेत्॥ भूशाय्या ब्रह्मचर्येण शक्तः स्नानं समाचरे
त्॥ अशक्तस्य धनाढ्यस्य स्वेच्छा सर्वत्र कथ्यते॥ धनाढ्यस्य बहुधनदानं कु
र्वतः॥ अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतेः॥ तिलस्नायी तिलोद्वर्ती
तिलहोमी तिलोदकी॥ तिलदस्तिलभोक्ता च षट्तिली नावसीदति॥ ते
लमामलकांश्चैव तीर्थे दद्यात्तु नित्यशः॥ तथा प्रज्वालयेदग्निं सेवनार्थं द्वि

५६

जन्मनां ॥ एवं स्नात्वावसाने तु भोज्यं देयमवारितं ॥ भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभू
षणैः ॥ कंबलाजिनरत्नानि वासांसि विविधानि च ॥ चोलकानि च देयानि प्रच्छादनप
टानि च ॥ उपानहौ तथा गुप्तमोचकौ पापमोचकौ ॥ अनेन विधिना दद्यान्माधवः प्री
यतामिति ॥ सवित्रे प्रसवित्रे च परधाम्ने जले मम ॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सह
स्रधा ॥ दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते ॥ परिपूर्णं करिष्येहं माघस्नानं तवा
ज्ञया ॥ अयं समापनमंत्रः ॥ अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ॥ माघा
वसाने सुभगं षड्रसं भोजनं तथा ॥ सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः ॥
दंपत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ॥ त्रिंशत्तु मोदकाः देयाः शर्करातिलसं
युताः ॥ भागत्रयं तिलानां तु चतुर्थः शर्कराशकः ॥ अनभ्यंगी वरारोहे सर्वं मासं न
येद्व्रती इति ॥ ॥ इति माघस्नानविधिः ॥ ॥ मकरसंक्रमे पराविंशति घटिकाः पु
ण्याः ॥ यथाह वसिष्ठः ॥ अतीतानागमे पुण्ये द्वे उदग्दक्षिणायने ॥ त्रिंश
त्कर्कटके नाड्यो मकरे विंशतिः स्मृता इति ॥ ब्रह्मवैवर्ते तु ॥ मकरे तु दशाधिका

इति पाठः ॥ रात्रौ मकरसंक्रमे तु परदिने सूर्योदयोत्तरं पूर्वमहर्द्वयं पुण्यं तथा च माधवि
यात्तरे ॥ कार्मुकं तु परित्यज्य मृगे याति दिवाकरे ॥ प्रदोषे वार्धरात्रे वा स्नानं दानं
परेहनीति ॥ वृद्धगार्ग्योपि ॥ प्रदास्तमयवेलायां मकरे याति भास्करः ॥ प्रदोषे वा
र्धरात्रे वा स्नानं दानं परेहनीति ॥ परेहनीत्युक्तेपि पूर्वाह्न एव आमन्त्रुसंक्रमे पुण्य
दिनार्धं स्नानदानयोरिति सामान्यवचनात् ॥ अत्र कृत्यं ॥ शिवरहस्ये गतेस्यूहे
स्मा तिलैः स्नानं कार्यं चोद्वर्तनं शुभैः ॥ तिला देया ब्राह्मणेभ्यः सर्वदेवोत्तरायणे ॥
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः ॥ कालिकापुराणे ॥ होमं तिलैः प्रकु
र्वीत सर्वदेवोत्तरायणे ॥ तान्यो देवाय विप्रेभ्यो हाटकेन समं ददेत् ॥ उत्तराय
णमासाद्य नरः कृस्नात्तत्राभ्यते पोषुतराणु सप्तम्यष्टमीनवमीषु पर्वसु धुरष्ट
कान्वष्टकाः कार्याः ॥ माघकृष्णद्वादश्यां तिलद्वादशीव्रतं ॥ ब्रह्मपुराणे ॥ मा
घे तु कृष्णद्वादश्यां मोहि भगवान् पुरा ॥ तिलानुत्पादयामास तपः कृत्वा सुदा
रुणं मित्यपक्रम्य ॥ तस्यां तु पोषितः स्नात्वा तिलैस्तस्यां जये हरिं ॥ तिलैर्वै कैनैदी

पाश्चदेपादेवृगृहेषु च॥ निवेदयेत्तिलानेव होतव्याश्चतिलाः सदा॥ तिलान्दद्याच्च
विप्रेभ्यो मत्स्यं चैतथातिलानिति॥ माघकृष्णे चतुर्दश्यां यमतर्पणमाह- हेमाद्रौ
यमः॥ अनर्काभ्युदिते काले माघकृष्णचतुर्दशी॥ स्नातः संतर्प्य तु यमं सर्वपापैः प्र
मुच्यते इति॥ माघामहोदयो नाम योगविशेषो मदनरत्ने नारदेनोक्तः॥ अमार्कपा
तश्रवणैर्युक्ता चेत्पुष्यमाघयोः॥ अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः॥ दिवै
व योगः शस्तोयं न तु रात्रौ कदाचनेति॥ पुष्यमाघयोर्मध्यवर्तिनी अमा पौषेऽपि ने
ति अमावास्येत्यर्थः॥ माघामायां व्यतीपाते आदित्ये विष्णुदैवते॥ अर्धो
दयं तद्विद्यात् कृःसहस्रार्कग्रहैः सममिति॥ तत्रैव॥ अर्धोदये तु संप्राप्ते सर्वं गंगासमं ज
लं॥ शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिता॥ यत्किंचिद्दीयते दानं तद्दानं मेरुसं
निभमिति॥ अत्र निर्णयामृते दानविशेष उक्तो दा॥ चतुःषष्टिपलैः कृत्वा यमन्त्रं तन्
कारयेत्॥ चत्वारिंशत्पलेनापि पंचविंशतिरेव चेति॥ एतच्च कांस्यमयं॥ एवं चतुःष
ष्टिं तु कृत्वा कांस्यभाजनमुत्तमं मितं कृत्वा॥ तथा तिलपायसं तत्र पक्वमुप
दद्यात् लिखेत्तत्र पद्मं कर्णिकायां कर्षमात्रं सुवर्णकं॥ तदभावे तदर्धं वा तदर्ह

वापि धारयेत् ॥ गन्धं मेति दंडुलैः शुद्धैः कृत्वाष्टदलमुत्तमे ॥ अमंत्रेः स्थापयेत्तत्र ब्रह्माविष्णु
शिवात्मकं ॥ तेषां पूजां ततः कार्यां श्वेतमाल्यैः स्रक्चामने ॥ वस्त्रादिभिरलंकृत्य ब्रा
ह्मणाय निवेदयेत् ॥ मंत्रेः ॥ सुपायसाम त्रेप स्मा त्रयीमयेः ॥ औपतैस्तारकं यः
स्मात् ढुंढहाणां द्विजोत्तम ॥ तथा ॥ समुद्रमेखला पृथ्वी सम्यक् दातुश्च यत्फलं ॥ तत्फ
लं लभते मर्त्यः हेतुं वेददानमुत्तममिति ॥ माघशुक्ले चतुर्थ्यां ढुंढिपूजा ॥ का
र्यात्ढे ॥ माघशुक्ले चेतुर्थ्यां तु नक्तेव्रतपरायणाः ॥ यत्नो ढुंढिं चेयि पूजिते व्यास
रसुरढुढं ॥ विधाय वार्षिकी यात्रां चतुर्थी प्राप्यतां पसीं ॥ शुक्लां शुक्लतिलान्
वध्वा ह्यशीयात्कृष्णकाष्ठतां ॥ तांयात्रां नाचयत् कुर्यान्नैवेद्यंति दुःखलड्डुकैः ॥ उपस
र्गसहस्रैस्तु सहतश्चो मसाक्षे यां ॥ होमेति क्लान्य दुर्बुद्धेः कीर्ष्यति मतिं ततः ॥ तस्यां
चतुर्थ्यां मंत्र ज्ञस्तस्य मंत्रैः प्रत्रास्य ते ति ॥ कुर्भीपुराणे ॥ माघशुक्ले चतुर्थ्यां तु कुंद
पुष्पैः समाशिवं ॥ संपूज्ययो हि नक्ताशी स प्राप्नोति श्रियं नरः ॥ इति ॥ माघशुक्ले
पंचम्यां रतिकामपूजा ॥ पुराणसमुच्चये ॥ माघमासे सितेश्रेष्ठे शुक्लायां पंच
मीति थो ॥ रतिकामौतु संपूज्य कर्तव्यसुमहोत्सवैः ॥ दानानि च प्रदेयानि तेन तुष्य
ति माधवा ॥ इति वाराहे ॥ माघशुक्ले चतुर्थ्यां तु वरमाराध्य चाश्रियः ॥ पंचम्यां कुं

दकुसुमैः पूजां कुर्यात्सम्यग्हृदय इति ॥ माघशुक्लसप्तमी रथसप्तमीसंज्ञा ॥ अस्याम
रुणोदयव्यापिन्यां स्नानं कार्यं ॥ तदुक्तं स्मृतिसंग्रहे ॥ सूर्यग्रहणतुल्या हि शुक्ला
माघस्य सप्तमी ॥ अरुणोदयवेलायां स्नानं तत्र महाफलं ॥ भविष्योत्तरे ॥ माघ
मासि सिते पक्षे सप्तमी कोटिभास्करा ॥ कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसं
पद इति ॥ इदं च स्नानं तिथ्यादि संकीर्त्य सप्तार्कपत्राणि सप्तबदरपत्राणि च शि
रसि निधाय कर्तव्यं ॥ शिष्टाचारात् ॥ तत्र मंत्रः ॥ यद्यज्जन्मकृतं पापं मया सप्तसु ज
न्मसु ॥ तन्मे रोगं च शोकं च माकरी हंतु सप्तमी इति ॥ अर्घ्यदानमंत्रः ॥ सप्तसप्तिव
ह प्रीत सप्तलोकप्रदीपन ॥ सप्तम्या सहितो देव गृहाणार्घ्यं दिवाकरेति ॥ त
तः प्रार्थना ॥ जननी सर्वलोकानां सप्तमी सप्तसप्तिके ॥ सप्तव्याहृतिके देवि नम
स्ते सूर्यमंडल इति ॥ इयं प्रयागे अतिमहती ॥ अरुणोदयवेलायां शुक्ला माघस्य
सप्तमी ॥ प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति वचनात् ॥ अस्यामेव भवि
विष्योत्तरोक्तः स्नानविधिः ॥ अरुंधतीप्रति वसिष्ठवचः ॥ माघस्यासितसप्त

म्यां सर्वकामफलप्रदं ॥ रूपसौभाग्यजननं स्नानं कुरु वरानने ॥ कृत्वा षष्ठ्यामे
कमक्तं सप्तम्यां निश्चलं जलं ॥ राज्यं ते चालये यास्त्वं दत्वा शिरसि दीपकान् के
ने चील्ये तथावत्तावत्स्नानं समाचरेत ॥ सौवर्णे राजते पात्रे शक्त्या वालुमये पथवा
॥ तैलेन वर्तिदीप्तव्या महारजनरंजिता ॥ समाहितमना नोत्वा दत्वा शिरसि दीपकं
॥ भास्करं हृदये ध्यात्वा इदं मंत्रमुदीरयेत् ॥ नमस्ते रुद्ररूपाय रसानां पतये नमः ॥
वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते ॥ जलोपरि ततो दीपं स्नात्वा संतर्प्य देव
ताः ॥ चंदनेन लिखित्पद्म मष्टपत्रं सकर्णिकं ॥ मध्ये शिवं सपत्नीकं प्रणवेन च
संयुतं ॥ शाक्रे दले रविः पूज्यो भानुश्चैवाग्निकेतपा ॥ याम्ये विवस्वान्नैरृत्ये भास्क
रपञ्ये हुवः ॥ पश्चिमे सविता पूज्यः पूज्योर्कश्चानिलेदले ॥ सोम्यसहस्रकि
रणः ईशे खसवीतनेनुमः ॥ पूज्याः प्रणवपूर्वास्तेन नमस्कारांतयोजिताः ॥ पुष्पैः
सुगंधधूपैश्च पपात्तेन युधिष्ठिर ॥ विसर्ज्यपवत्सं सवीतं स्तुत्वा स्नानं गम्यतामि
ति ॥ ततो गृहं गत्वा ॥ ताम्रपात्रे यथाशक्त्या मन्मये वाथ भक्तिमान् ॥ स्थापये

तिलपिष्टं चसघृतं सगुडं तथा॥ कांचनं ताम्लकेहत्वा अशक्तस्तिलपिष्टजं॥ संछा
द्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत्॥ ततस्तं वाचयेद्विप्रैर्दद्यान्मंत्रेण ताम्लकं॥ मं
त्रः॥ आदित्यस्य प्रसादेन प्रातःस्नानफलेन च॥ दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु ता
म्लकं॥ ताम्लकं कर्णभरणं॥ पूजयित्वोपदेष्टारं विप्रानन्यांश्च पूजयेत्॥ ततः पाखंडा
दिभिरालापादीन्वर्जयन्स्वपेद्ध्याय नमस्तिवाहयेत्॥ [illegible]॥ नैकेभुंजीत चन
रादीनान्संभोज्य शक्तित इति॥ इयं मन्वादिषु कोपदासष्ठत्वालुपपूर्वाह्णव्यापिनी
यात्वा॥ माघशुक्लाष्टम्यां भीष्मतर्पणादि कार्यं॥ तदुक्तं पाद्मे॥ माघे मासि सिता
ष्टम्यां सतिलं भीष्मतर्पणं॥ श्राद्धं चैवं सदा कुर्युस्ते स्युः संततिभागिन इति॥ अत्र
श्राद्धं काम्यं॥ तर्पणं काम्यं नित्यं च॥ ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्मा
य नो जलं॥ संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमेति॥ मदनरत्ने धृतवचनात॥
इदं जीवत्पितृकेणापि कार्यं॥ जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति वच
नात्॥ तर्पणमंत्रश्च॥ भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः॥ आभिरद्भिरवा

प्रोतेपुत्रपौत्रोचितांक्रियां॥ वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च॥ अपुत्राय ददाम्ये
तज्जलंभीष्माय वर्मणे इति॥ माघशुक्ले कादशी भीष्मद्वादशी संज्ञा॥ तदुक्तं पाद्मे
॥ त्वयाकृतमिदंवीर तव नाम्ना भविष्यति॥ सा भीष्मद्वादशीत्येषा सर्वपापहरा
शुभेति॥ द्वादशी एकादशी॥ एकादश्यां निराहारः समभ्यर्च्य च केशवमिति सके
ल्पमंत्रलिंगात्॥ इयं परविद्धा ग्राह्या॥ रुद्रेण द्वादशी युक्तेति युग्मवाक्यात्॥ मा
घ्यां कृत्यविशेषो भविष्योत्तरे॥ वैशाखी कार्त्तिकी माघी तिथयो ऽतीव पूजिताः॥
स्नानदानविहीनास्ता॥ न नेयाः पांडुनंदनेति॥ तत्रैव॥ माघ्यां स्नात्वा तथा संभ्य
र्च्य संतर्प्य पितृदेवताः॥ तिलपात्राणि देयानि तिलाः सपयः लोदनाः॥ कार्पासदा
नमत्रैव धेनुदानं प्रशस्यते॥ कंबजिनरत्नानि मोचको पापमोचकौ॥ उपानद्दान
मत्रैव तुल्यसंश्वरूपे नतु॥ अत्र वा तत्र वा स्नानं दानं वित्तानुसारतः॥ कालंकालोद्
वं सर्वं शस्यते पांडुनंदन॥ तथा॥ नेकवेळ ब्राह्मणानां दानमत्र प्रशस्यते॥ भगि
नीभागधेयानां मातुलानां पितृष्वसः॥ दरिद्राणां च बंधूनां दाने कोटिगुणं तदा भ

ति ॥ इयमेव योगविशेषेण माहामाघी ॥ तथा च गार्ग्यः ॥ मेषराशौ यदा सौरिः सिंहे चंद्र
बृहस्पती ॥ भास्करः श्रवणर्क्षे च माहामाघीति सा स्मृता ॥ सौरिः शनैश्चरः ॥ इयं प्रया
गे तिप्रशस्ता ॥ माहामाघी प्रयागे तु नैमिषे फाल्गुनी तथा ॥ शालग्रामे महाचैत्री कृता
पुंसां महाफलेति ॥ माघ्यपर्व चैतत् ॥ माघ्येन माघकृष्ण चतुराष्टमी अष्टकाहेमंत
शिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इत्याश्वलायनसूत्रात् ॥ अमांत
मासेन माघकृष्ण चतुर्दशी शिवरात्रिः ॥ शिवरहस्ये ॥ तत्र मत्यु थदे वर्षे माघकृष्ण
चतुर्दशी शिवरात्रिः समाख्याता त्रिषु लोकेषु पूजितेति ॥ स्कांदेपि माघफाल्गुन
योर्मध्ये असितायाश्चतुर्दशी ॥ शिवरात्रिः समाख्याता सर्वयज्ञोत्तमोत्तमेति ॥ शि
वरात्रिव्रते चोपवास पूजाजागरणरूप प्रधानत्रयसमुदायरूपं ॥ उपासनाभावेन
बलादपि च जागरात् ॥ शिवरात्रेस्तथा तस्यां लिंगस्यापि च पूजया ॥ अक्षयाल्लभते
भोगान् शिवसायुज्यमाप्नुयात् ॥ इति जागरखंडे ॥ त्रयाणामपि फलसंबंधात् ॥ क्व
चिदुपवासमात्रश्रवणात्विन्तरयोरुपलक्षणं ॥ क्वचित्तु अचाकेवृत्यनुपकल्पने
कस्पेदपौवाश्चिवणं ॥ अथ शिवरात्रिव्रतपूजाजागरणेन येते ॥ कोचि तुल्पाविरो

^वां

म

षेणव्रतहानोपि यः पुमान् ॥ जागरं कुरुते तत्र स रुद्रसमतां व्रजेदित्यादिषु ॥ अथ वाद्धि
थवणात् ॥ अत्रापि जन्माष्टमीवद्धा चावपित्रयोदश्या वेधो न वेति ॥ रात्रिसाध्यव्रतत्वा
त् ॥ तदुक्तं स्कांदे ॥ निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः ॥ अतस्तस्यां चतुर्दश्यां स
त्यां तत्पूजनं भवेदिति ॥ नारदस्कंदेपि ॥ तस्मात्सर्वासु हि मत्पूजायां कुर्यात्तु मानवः ॥
ति ॥ तत्रोर्ध्वं त्रयोदश्यां वर्तमानया त्रयोदश्या युक्ता चतुर्दशी परेद्युर्निशीथव्या
प्त्यभावेपि परैव ॥ माघासिते भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या ॥ जयाप्रयुक्ता
न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति हेमाद्र्याद्युदाहृतवचनात् ॥ जययाः
त्रयोदश्या प्रकर्षेण युक्तामित्युक्तत्वात्पूर्वेद्युस्त्रयोदशी बहुरात्रिव्याप्तिप्रतीतेः ॥ या
तु पूर्वेद्युरेव निशीथयोगिनी दिनद्वयेपि वा निशीथयोगिनी सा पूर्वैव ॥ कल्पाष्टमी स्कं
द षष्ठी शिवरात्रि चतुर्दशी ॥ एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत् ॥ तथा ॥ जयं
ती शिवरात्रिश्च कार्ये भद्राजयान्विते ॥ तथा ॥ माघफाल्गुनयोर्मध्ये यास्याच्छिव चतुर्द
शी ॥ अनंगेन समायुक्ता कर्तव्या सा सदा तिथिरिति ॥ न पूर्वेद्युरेव निशीथयोगिनी
कालयोगात्पूर्वैव लिखितवचने भ्यः पूर्वैवेत्युक्तं दिनद्वयेप्यतद्योगिनी तु परेद्युः

69

प्रदोषनिशीथोभयव्याप्तिलाभात्संकल्पकालाभ्यासत्वादहोरात्रोभयपो
गाच्च परैरेवयुक्ता न तु पूर्वा॥ अत एव माधवेनापि दिनद्वयनिशीथव्यापिनी पू
र्वैव ग्राह्येत्युक्तं॥ तिथितत्त्वेप्येवमेव॥ तत्कथं पूर्वैव त्वत्र व्याप्त इति चेत्॥ उच्यते॥
अहरात्रपुरस्ताच्चेज्जयायोगो यदा भवेत्॥ पूर्वविद्धैव कर्तव्या शिवरात्रिः शि
वप्रियैरिति पद्मपुराणवचनमीदृश एव विषये पूर्वविद्धाविधानार्थं॥ अंत
तः सर्वोप्यपि पूर्वविद्धाविधायकानि प्रागुक्तवचनानि वाक्यानि महतामपि पापा
नां दृष्टा वै निःक्षेतिः पुराणेन दृष्टा कुर्वता पुंसां कुहूयुक्तायां तिथौ त्विमामिति स्कं
दपुराणीयोमावास्यानिषेधश्चैतादृशविषय एव सार्थकः॥ पूर्वस्या एव नि
शीथयोगे पूर्वाग्रहणस्य वचनोत्तरेणैव सिद्धत्वात्॥ तथा च नारदीये॥ माघ
कृष्णचतुर्दश्यामादिदेवो महानिशि॥ शिवलिंगतया समुद्भूतः कोटिसूर्यस
मप्रभः॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः॥ तथा॥ पूर्वेद्युरपरेद्यु
र्वा महानिशि चतुर्दशी॥ व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नर इति॥ २

वं सति पूर्वोक्तवचनानामानर्थक्यात्तानि दिनद्वयनिशीथव्यापिन्याः पूर्वस्या
याः ग्राह्यत्वे प्रतिपादयंति ॥ किंच ॥ अर्हद्रात्रात्पुरस्ताच्चेदिति वचने पूर्वविद्धैवेत्येव
कारादुत्तरविद्धा निवर्तका उत्तरविद्धायाः प्रशस्तिर्गम्यते ॥ साचोभयत्र निशी
थयोग एव संभवति न तु पूर्वत्रैव निशीथयोगे ॥ तस्मादुभयत्र निशीथव्या
पिन्यपि नो पूर्वैवेति ॥ तदुक्तं स्कंदपुराणे ॥ आदौ मार्गशिरे मासि दीपोत्सवदि
नेपि वा ॥ शुक्लायां माघमासे वा द्वादशैवमुपोषयेदित्यादिवचनैः प्रतिमा
सं कृष्णचतुर्दशीषु प्रजापवासजागरणात्मकं काम्यं शिवरात्रिव्रतं विहि
तं तस्यापि रात्रौ प्रतियामं पूजायां जागरणस्य च विधानात्सकलरात्रिसा
ध्यत्वात् कृत्स्नरात्रिव्यापिनी ग्राह्या ॥ दिनद्वये रात्रिव्याप्तिसाम्ये पूर्वा ॥ कृष्ण
व्रतेषु सर्वेषु कर्तव्यास्तं तु स्वीतिथिरिति ॥ व्रतस्यैव वृत्तात् ॥ एषा प्रदोषव्याप्ति
रिति निर्णयामृते कृ......ष्णचतुर्दश्यां
रविवारो यदा भवेत् ॥ भौमोवाथ भवेद्देवि कर्तव्यं व्रतमुत्तमं ॥ शिवयोगस्य यो

गे चतुर्दृ वेदुत्तमोत्तममिति ॥ तथा ॥ त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ॥
अंते चैव सिनीवाली त्रिस्पृशां शिवमर्चयेदिति । पारणं चैव तस्य स्कंदपुराणे
वतिथ्यंते तिथिमध्ये च विहितं ॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रि चतुर्दशी ॥ एताः
पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति ॥ उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणं
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वेति । तत्र सा त्वस्तमयपर्यंतं व्यापिनी
चेत्परेहनि ॥ दिवैव पारणं कुर्यात्पारणे नास्ति दोषभागिति । शिवरात्रिप्र
करणपठितेकाल्लादर्शादितिलिखितवचनात्तिथ्यंते प्रतीक्ष्यदिवा पारणस्य
कर्तुमशक्यत्वे तिथ्यंते नो चेत्तिथिमध्ये एतेति व्यवस्था ॥ अथ प्रसंगतः ॥ शि
वरात्रिव्रतानुष्ठानप्रकारः ॥ विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया ॥ पूजि
तोपि महादेवो न स्यात्तस्य फलप्रदः ॥ तस्मान्मृदापि कर्तव्यं ललाटे तु त्रिपुंड्र
कं ॥ मितिलैंग्यात्रिपुंड्रे तेरुद्राक्षास्तिथ्याद्युक्तिश्च शिवप्रतिकामः ॥ शिवरा
त्रिव्रतं ह्येतत्करिष्येहं महाफलं ॥ निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते ।

तुर्दश्यां निराहारो भूत्वाहं शंभो परेहनि ॥ भोक्ष्येत्तु भुक्तिमुक्त्यर्थं शरणं मे भवे-
श्वरेति पठित्वा जलमुत्सृजेत् ॥ ततो नित्यकृत्यं विधाय रात्रौ प्रथमप्रहरे अघशि-
वपूजां करिष्य इति संकल्प्य पूर्वप्रतिष्ठिते लिंगे अप्रतिष्ठिते वा तद्देवप्राणप्र-
तिष्ठां कृत्वा पार्थिवलिंगं प्रणामप्रकारेण पंचाक्षरेण मंत्रेण वैदिकेन वा पौराण-
मंत्रैर्वा प्रणवादिचतुर्थ्यन्तैर्नमोन्तैः शिवनाम्नावा आवाहनाद्युपचारैः पूजयेत् ॥
तत्र विशेषः ॥ ॐ ह्रौं ईशानाय नम इति प्रथमप्रहरे दुग्धेन स्नपनं ॥ शिवरात्रिव्रतं
देवि पूजाजपपरायणः ॥ करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर ॥ इत्यर्घ्यदानं च ॥
ततस्तन्मंत्रजपेन तत्कथाश्रवणादिभिर्जागरणं ॥ तद्ध्यानं तज्जपः स्नानं त-
त्कथाश्रवणादिकं ॥ उपवासकृतां ह्येते गुणाः प्रोक्ता मनीषिभिरिति वचनात् ॥
द्वितीयप्रहरे ॥ ॐ ह्रौं अघोराय नम इति दध्ना स्नपनं ॥ नमः शिवाय शांताय स-
र्वपापहराय च ॥ शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह ॥ इत्यर्घ्यदानं ॥ तृतीय
प्रहरे ॥ ॐ ह्रौं वामदेवाय नम इति घृतेन स्नपनं ॥ दुःखदारिद्र्यशोकेन दग्धोहं

पार्वतीपते ॥ शिवरात्रौ ददाम्यर्घ्यमुमाकांत गृहाण मे इत्यर्घ्यदानं ॥ चतुर्थप्रह
रे ॥ ॐ हौं सद्योजाताय नमः इति मधुस्नपनं ॥ मया कृतान्यनेकानि पापानि हर शं
कर ॥ शिवरात्रौ ददाम्युमाकांत गृहाण मे इत्यर्घ्यदानं ॥ एवं मूलमंत्रजपादिना
रात्रिमतिवाह्य प्रभाते ॥ अविघ्नेन व्रतं देव त्वत्प्रसादात्समापितं ॥ क्षमस्व जगतो
नाथ त्रैलोक्याधिपते हर ॥ यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितं ॥ त्वत्प्रसादा
न्महादेव व्रतमद्य समर्पितं ॥ प्रसन्नो भव मे श्रीमन् सद्गतिः प्रतिपाद्यतां ॥ त्वदालो
कनमात्रेण पवित्रोस्मि न संशय इति ॥ व्रतं समर्पयेत् ॥ परदिने यथाशक्ति ब्राह्म
णान्भोजयित्वा ॥ संसारक्लेशदग्धस्य व्रतेनानेन शंकर ॥ प्रसीद सुमुखो नाथ ज्ञा
नदृष्टिप्रदो भवेति ॥ प्रार्थ्य बंधुभिः सह पारणं कुर्यादिति ॥ इदं च व्रतं नित्यं ॥ वर्षे
वर्षे महादेवि नरो नारी पतिव्रता ॥ शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेदिति ॥
स्कांदे ॥ वर्षे वर्षे इति वीप्साश्रवणात् ॥ परात्परतरं नास्ति शिवरात्रिव्रतात्परं ॥
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं ॥ जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशय

यइति ॥ तत्रैवाकरणे दोषश्रवणाच्च ॥ काम्यं च ॥ शिवं च पूजयित्वा यो जागर्ति चतु
र्दशीं ॥ मातुः पयोधररसं न पिबेत्स कदाचन ॥ मम भक्तस्तु यो देवि शिवरात्रि
मुपोषकः ॥ गणत्वमक्षयं दिव्यमक्षयं शिवशासनं ॥ सर्वान्भुक्त्वा महाभोगान्
अंते मोक्षमवाप्नुयात् ॥ इति तत्रैव फलश्रवणात् ॥ अत्र च चंडालपर्यंतानामधिका
रः ॥ शिवरात्रिव्रतं नाम सर्वपापप्रनाशनं ॥ आचांडालमनुष्याणां भुक्तिमुक्ति
प्रदायकमिति ॥ शासनसंहितावचनात् ॥ इति शिवरात्रिनिर्णयः ॥ एतदुत्तरा
मावास्या युगादिः ॥ दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगमिति ॥ कादातः ॥ अ
मावास्या वै माघस्येति ॥ मत्स्यपुराणाच्च ॥ ब्रह्मवैवर्ते तु माघी पौर्णमासी युगा
दिरित्युक्तेः ॥ माघे च पौर्णमास्यां तु घोरं कलियुगं तथेति ॥ विष्णुपुराणे ॥ माघासि
ते पंचदशी कदाचिदुपैति योगं यदि वारुणेन ॥ ऋक्षेण कालः स परः पितॄणां नत्व
ल्पपुण्यैर्नृप लभ्यते सौ ॥ विति वारुणं शततारका ॥ महाभारते ॥ कालिंधानेष्ठापादि
नामतस्तिस्त्रेवतुर्थपाकेन दापितम्पः ॥ दत्तेति लावण्यं प्रददाति तस्मिं वर्षायुतं तत

खेलनैर्मनुष्यैरिति ॥ फाल्गुणपौर्णमास्यां होलिकोत्सवः ॥ भविष्योत्तरे ॥ अथ
पंचदशी शुक्ला फाल्गुनस्य नराधिप तस्यां प्रक्रम्यते पार्थ शंकितो लोकारमंतु
च हसंतु च ॥ दारुजानि च खड्गानि गृहीत्वा समरोत्सुकाः ॥ योधाइव विनिर्यांतु शि
शवः संप्रहर्षिताः ॥ संचयं शुष्ककाष्ठानां उपलानां च कारयेत् ॥ तत्राग्निं विधिव
द्दत्वा रक्षोघ्नैर्मंत्रविस्तरैः ॥ ततः किलकिलाशब्दैस्तालशब्दैर्मनोहरैः ॥ तमग्निं
त्रिःपरिक्रम्य गायंतु च हसंतु च ॥ जल्पंतु स्वेच्छया लोका निःशंका यस्य यन्मतं ॥ भे
गे बहुविधैः शब्दैः कौंतेय नृशंसभाषया ॥ विस्तारयेच्च यायं च हे सं स्वनामुतस्य वै ॥
सर्वदुष्टापहो होमः सर्वरोगोपशांतिदः ॥ क्रियते स्यां द्विजैः पार्थ तेन सा होलिका
स्मृता ॥ अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ॥ गोमयेनोपलिप्ते च सचतुष्क
गृहांगणे ॥ आकारयेच्छिशुप्रायान् खड्गव्यग्रकरान्नरान् ॥ ते काष्ठखड्गैः संस्पृश्य
गीतैर्हास्यकरैः शिशून् ॥ रक्षंति तेषां दातव्यं गुडं पक्वान्नमेव च ॥ होलिकापूजा
मंत्र आधुनिकनिबंधेषु ॥ अस्माभिर्भयसंत्रस्तैः कृता त्वं होलि बालिशैः ॥ अतस्त्वां

प्रगयिष्यामि भूते भूतप्रदा भवेति ॥ एतदनंतरं प्रतिपदि ॥ कृत्वावश्यकार्याणि
संतर्प्य पितृदेवताः ॥ वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये ॥ मंत्रेणानेन रा
जेंद्र पठ्यमानं निबोध मे ॥ वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वा
पाहि नो देवी विभूते भूतिदा भवेति ॥ होलिकादीपनं च प्रदोषे कार्यं ॥ तथा च
पृथ्वीचंद्रोदये दूर्वाससो वचनं ॥ निशागमे तु संपूज्या होलिका सर्वतो मुखैरि
ति ॥ तत्र भद्रापातस्त्यां न कर्त्तव्यं ॥ भद्रायां दीपिता होली राष्ट्रभंगं करोति वै ॥
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेदिति ॥ पुराणसमुच्चये ॥ तत्र पूर्वस्यां
प्रदोषे भद्रायाश्च सत्वे तत्रैव कार्यं ॥ यदा तु भद्रा भवति तदा अपुच्छे भवेत्वा
तः शेषस्यापि दयः स्मृत इति ॥ परिभाषितस्यापि दियात्पूर्वभद्रांतप्रतीक्ष्य होलि
कादीपनाय यदि कश्चित्कालो लभ्यते तथा प्रदोषातिक्रमेणापि तत्रैव कर्त्तव्यं ॥ रा
कापामभद्राद्र पूर्वे चतुर्दश्यां यदा भवेत ॥ होली भद्रावसाने तु निशीथांतेपि
दीपयेदिति ॥ न विध्यातरा ॥ यदा तु पूर्वदिने भद्रारहितः कालो न लभ्यते

उत्तरदिने स्पर्शास्तात्पूर्वं एव पूर्णिमासमाप्ता तदा मन्वादिपुच्छे कार्यं॥ पृथिव्यां
यानि कार्याणि शुभानि त्वशुभानि च॥ तानि सर्वाणि सिद्ध्यंति विशिष्टपुच्छे न सं
शय इति॥ ज्योतिर्वचनात्॥ अस्मिन्नेव विषये यदा उत्तरा पौर्णमासी सा
र्द्धयामत्रयपरिमिता अधिका वा प्रतिपच्चोत्तरदिने ह्रस्वगामिनी तदा पौर्ण
मास्युत्तरप्रतिपत्प्रदोष एव कार्य न तु पूर्वरात्रौ विशिष्टपुच्छे॥ तथा च भविष्योत्त
रे॥ सार्द्धयामत्रयं पूर्णा द्वितीये दिवसे यदा॥ प्रतिपद्वर्द्धमाना तु तदा सा हो
लिका स्मृतेति॥ एवं सति योत्तरदिने पिकल्त्वे प्रदोषे तदेकदेशे वा वर्त्तते
सा तु तत्रानुत्तरा॥ पूर्वोक्तं तु पूर्वविहितापात्यत्वं तु तत्र प्रदोषास्पर्शे हि
भावे च ज्ञेयं॥ ननु यदा पूर्वरात्रिः सर्वा भद्राव्याप्ता तु उत्तरदिन प्रदोषस्पर्शं दूर
हणात्कोत्तत्तदा सर्वेषामेव वर्णानां स्तुतेकं नदर्शन इत्यशुचित्वात्कथं
तत्र होलिकादीपनं॥ उच्यते॥ ज्वालाकेशालिकुर्वीत च तमन्नं विवर्जये
दिति॥ वचनात्तन्नानौचारे नित्यानिमित्तिकबाधकाभिधानादिति॥ अत्रैव

च स्नानविशेषः ॥ कृत्यचिंतामणौ ब्राह्मे ॥ नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्त
मं ॥ फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजेत् ॥ इयं च मन्वादिरपि ॥ निर्णय
सिन्धावेवमेव ॥ एतद्दिने प्रतिपदि कृत्ये विशेषो भविष्योत्तरे ॥ प्रवृत्ते माधवे मा
सि प्रतिपद्युदिते रवौ ॥ वित्युपक्रम्य ॥ मंत्रितं चर्चितं चैव कुर्यात्पक्षिमे गृहांतरे ॥ चूत
च्छकाराये हृष्टं वर्णके श्वासते शुभे ॥ तन्मध्ये स्थापयेत्पीठं शुक्लवस्त्रोत्तरच्छ
दं ॥ अग्रतः पूर्णकुंभं च स्थापयेत्पल्लवैर्युतं ॥ साक्षतं सुहिरण्यं च सितचंदनच
र्चितं ॥ आसने चोपविष्टस्य ब्राह्मणो घोषेण भारत ॥ चर्चयेच्चंदनेनारी अंगमं
गमुत्तमं ॥ ततः परा गोत्रजैः देवदाश्चेष्ठाष्टकविज्ञपितं ॥ वंदुधा होशिरोतं
च दधि दूर्वाक्षतान्वितं ॥ वंदयित्वा च श्रीखंड आयुरारोग्यवृद्धये ॥ वंदे धात्र
मिति पादौ दारम्य मूर्ध्नि चंदनेन चर्चयेदित्यर्थः ॥ तच्चंदनं वंदयित्वा किं
चिद्दवशेष ॥ पश्चात्स्वप्राशयेद्विद्वान् चूतपुष्पं सचंदनं ॥ मनो भवस्य तावत्सुरो
क्षिप्तिः संप्रदायिता ॥ प्राशनमंत्रश्च ॥ चूतमग्र्यं वसंतस्य माकंदं कुसुमं तव

वृ॥ सचंदनं पिबाम्पद्य सर्वकामसमृद्धये॥ अनंततरं द्विजेंद्राणां सुतमागध
चंदनं॥ दद्याद्दानं यथाशक्त्या कामो मे प्रीयतामिति॥ ततो भोजनवेलायां श्र
ते पाके नतेनिहि॥ आशायेत्प्रथमं प्राश्नंततो भुंजीत कामतः॥ य एवं कुरुते
पार्थ शास्त्रोक्तं प्राल्गुनोत्सवं॥ अनायासेन सिद्ध्यंति तस्य सर्वमनोरथा इति॥
अस्यापवादविशेषः॥ पद्मपुराणे॥ चैत्रमासि महाबाहो पुण्या प्रतिपदा परा॥ त
स्यां यः श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः॥ न तस्य दुरितं किंचिन्नाधयो व्याध
यो नृप॥ भवंति कुरुशार्दूल तस्मात्तां समाचरेत्॥ ब्राह्मणानां ततो भोज्यं कुर्या
त्कुरुकुलोद्वहेति॥ अत्र प्रतिपदो दायिकीयत्वात्॥ प्रवृत्ते मधुमासे तु प्रतिपद्यु
दिते रवाविति॥ भविष्योत्तरादितिकेचित्॥ होलिकादीपनाव्यवहितोत्तरादि
ने स्नानमिति युक्तं॥ अतएव वृद्धैर्वसिष्ठेन ... वापि विहिता॥ वत्सरादौ वसंतादौ
बलिराज्ये तथैव च॥ तैलाभ्यंगमकुर्वाणो ... नरकं प्रतिपद्यत इति॥ वृद्धवसि
ष्ठवचनात्प्रतिमाते चैत्रकृष्णत्रयोदशी ... ते मिथ्यायुतावारुणी तत्र गंगास्ना

नेमूहापफलं॥ पुनर्दुर्गंभस्यां दोः॥ वाहलेनसमायुक्ता [illegible] धौकुंभा त्रयोदशी॥ गंगायां यदि
लभ्येत सूर्यग्रहशतैः समा॥ इयमेववारु [illegible] लरयोगेन महावारुणी॥ शुभयोग
योगेन महामहावारुणी महाफलाच्युतया [illegible] चैव॥ शनिवारसमायुक्ता महावा
रुणीस्मृता॥ गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा॥ शुभयोगसमायुक्ता श
नौ शततभिषा यदि॥ महामहेति विख्याता त्रिकोटिकुलमुद्धरेदिति॥ फाल्गुना
मावास्या मन्वादिः॥ फाल्गुनस्य त्वमावास्येति मात्स्यात्॥ सा चापराह्णिकी ग्राह्या
कल्पपक्षेण तत्वादिति शिवः॥ अन्ये तु अन्यः॥ ऋषिचंद्रमिते वर्षे माघकृष्णगहरौर
विवारे॥ ग्रंथपूर्तिमकरोत्किल रामः श्रीरमापतिसमर्पणबुद्ध्या॥ तत्सोद्व
श्यप्रसूतो यो रामचंद्रेति विश्रुतः॥ तेनेयं निर्मिता सम्यक्कालोपरत्नावली शुभा॥
अनया प्रीयतां लक्ष्मीनृसिंहो भक्तवत्सलः॥ कुलदैवतमित्येतद्दृष्टमस्या
शुभा मतिः॥ ॥ इति श्रीमद्वेदतत्वार्थाभिज्ञतत्सद्वालकृष्णभट्टसुतविठ्ठलभ
ट्टसूरिसुत रामचंद्रविरचिता कालोपरत्नावली समाप्ता॥ ॥ श्रीसंवत १७७७ श्री

६७

७४